Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युगप्रधान दादाश्री आर्य-जय-कल्याण प्रकाशन क्रमांक (९)

अचलगच्छेश-मंत्रप्रभावक-श्री-मेरुतुंगसूरीश्वरांतेवासिना

श्री-माणिक्यसुन्दरसूरिणा संदृब्धा

# गद्यबद्ध-श्री मलयसुन्दरी-कथा ॥

: प्रकाशक :

युगप्रधान दादाश्री आर्य-जय-कल्याण प्रकाशन-मुंबइ

—: संयोजक :—

अचलगच्छाधिपति प. पू. आचार्यदेवश्री गुणसागरसूरीश्वरस्य

शिष्य-मुनिश्री-कलाप्रभसागरजी.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



-: प्राप्तिस्थान :-
लखमशी गेलाभाइ कुं.
३, चीचबंदर रोड
मुंबइ नं. ९

प्रथमावृत्ति. नकल १०००

卐 卐

वीर निर्वाण २५०४. वि. सं. २०३४

: मुद्रक :
कांतिलाल डी. शाह
भरतप्रिन्टरी
दाणापीठ पाछळ, तळाव
पालीताणा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ अर्हं नमः

श्री-माणिक्यसुन्दरसूरि-संदृब्धा

# गद्यबद्ध-श्री मलयसुन्दरी-कथा ॥

## अथ प्रथम उल्लासः ।

जातो यः कमलाकरे शुचिकुले श्रीअश्वसेनेशितुः, प्रेङ्खद्भोगफलावलीवरदलः प्रोन्मीलिनीलच्छविः ।
सत्कीर्त्या सुरभिर्ददातु सुमनोराजीवराजी विभुः, स श्रीपार्श्वजिनेश्वरः सुरतरुः श्रेयःफलं नः सदा ॥ १ ॥

तं प्रणम्य प्रभुं पार्श्वं सर्वकल्याणकारकम् । कथा मलयसुन्दर्याः सौन्दर्यसहितोच्यते ॥ २ ॥

ज्ञाने शीले क्षमायां च जिनाशातनवर्जिते । कथा मलयसुन्दर्या ज्ञेया च व्रतपालने ॥ ३ ॥

श्रीपार्श्वनाथदेवस्य केशिना गणधारिणा । पूर्वं शङ्खनरेन्द्राग्रे कथितेयं कथा प्रजा ॥ ४ ॥

प्राकृतैः संस्कृतैः पद्यैः कृता पूर्वे सविस्तरा । कथाऽसौ गद्यग्रन्थेन संक्षिप्य किल कथ्यते ॥ ५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथाहि—इह जम्बूद्वीपे भरतक्षेत्रे चन्द्रावती नगरी । तत्र वीरधवलो नाम राजा । तस्य चम्पकमालानाम्नी राज्ञी, द्वितीया कनकवती च । ताभ्यां द्वाभ्यां राज्ञीभ्यां सह सुखेन राजा कालम् अनिचक्राम । अन्यदा राजसभायां प्रविष्टः प्रतिहारेण विज्ञप्तः—'प्रभो ! गुणधर्मश्रेष्ठी तव द्वारे तिष्ठति'। राजादेशे जाते सति स श्रेष्ठी प्राभृतं पुरो मुक्त्वा नृपं नत्वाऽतिष्ठत् । राज्ञोक्तम्—'कस्त्वम् ?, केन हेतुना प्राप्तोऽसि ?'। स प्राह—"श्रूयताम् , हे प्रभो । अत्रैव तव नगरे लोभनन्दी लोभाकरश्च द्वौ भ्रातरौ वर्तेते । लोभनन्दी पुत्ररहितो, लोभाकरस्य तु गुणवर्मा पुत्रः ।

"अन्यदा तौ द्वावपि श्रेष्ठिनौ हट्टनिविष्टौ भद्राकारं कञ्चिन्नरं दृष्ट्वा सन्मार्गदानेन प्रतिपत्तिं कृत्वा विश्वासवन्तं चक्रतुः । तेन पुरुषेण रक्षणार्थं रसतुम्बकम् एकमर्पितम् । ताभ्यां हट्टान्तरुद्बध्य मुक्तम् । पुरुषस्तु क्वापि गतः । अथ रसतुम्बकाद् गलित्वा रसबिन्दवः पतिताः, तैश्च अधःस्थितं कुशीप्रमुखं लोहं स्वर्णरूपं दृष्ट्वा वणिजौ विस्मितौ । लोभान्धाभ्यां ताभ्यां तत् तुम्बकं क्वापि गोपितम् । कियत्सु दिवसेषु गतेषु तुम्बकमोक्ता पुरुषः समेत्य तुम्बकं ययाचे । श्रेष्ठिभ्यां कथितम्—'भोस्तत् तुम्बकं भग्नं, यदि प्रत्ययस्तस्य तदा खण्डानि पश्य'। इत्युक्त्वा अन्यस्य कस्यचित्तुम्बकस्य खण्डानि दर्शितानि । तेन तानि दृष्ट्वा चिन्तितम्—'नूनम् एतानि मम तुम्बकस्य न भवन्ति, किन्तु लोभान्धौ वणिजौ ममाग्रे कूटम् उत्तरं कुरुतः' तेन बह्वपि प्रोक्तं, परं तुम्बकं न दत्तम् । ततस्तेन पुरुषेण क्रुद्धेन सता लोभनन्दि-लोभाकरौ गृहतोड्डकस्थाने स्तम्भनीविद्यया कीलितौ व्यथाऽऽकुलौ



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रन्दन्तौ तिष्ठतः । स पुरुष एवं कृत्वा गतः । लोभाकरपुत्रो गुणवर्मा ग्रामान्तरादागतः । तत्स्वरूपं लोकमुखाद् ज्ञात्वा दुःखितो मन्त्र–तन्त्रादिकं कारयामास, परं तयोर्द्वयोरपि विशेषतो व्यथाऽभूत् । ततश्चिन्तितम्—'येन कीलितौ तेनैव मोक्षः, नान्येन'। इति विमृश्य कुटुम्बस्य गृहशिक्षां दत्त्वा तं पुरुषं द्रष्टुं चलितः । पृथ्वीतले भ्रमन् क्वापि धन–धान्यसमृद्धमपि निर्मानुषं नगरं दृष्ट्वा विस्मितो मध्येऽविशत् । तेन गच्छता एकः पुरुषो दृष्टः । तेनोक्तम्–'हे वीर ! कस्त्वम् ?, किमिदं नगरं शून्यम् ?'। तेनाप्युक्तम्–'त्वं कः ?'। सोऽवादीत्–'अहं पथिकः, परं स्वरूपं कथय'। इत्युक्ते स वीरपुरुषोऽवादीत्–"शृणु, इदं कुशवर्द्धनं नाम नगरम् । अत्र सूरो नाम राजा । तस्य जयचन्द्र–विजयचन्द्रौ पुत्रौ । पित्रा जयचन्द्राय राज्यं दत्तम् । पितरि विपन्ने[1]ऽहं विजयचन्द्रोऽहङ्कारं धृत्वा अस्मात् पुरान्निर्गत्य भ्रमन् चन्द्रावतीनगरीं यातः । तद्वने मया कोऽपि सिद्धपुरुषोऽतीसाररोगी दृष्टः । मया कृपया स उपचरितः, पटुर्जातः । तेन तुष्टेन स्तम्भनी वशीकरणी च द्वे विद्ये दत्ते, सुवर्णनिष्पादकरसतुम्बकं च दत्तम् । इति दत्त्वा सिद्धनरः श्रीपर्वते गतः । अहं च चन्द्रावतीमध्ये लोभनन्दि–लोभाकरहट्टं गतः । ताभ्यामावर्जितः[2] । तयोर्हस्ते रक्षणाय रसतुम्बकमर्पितम् । मया तत्रैव पुरे कौतुकानि पश्यता कियन्ति दिनानि स्थित्वा मातुर्मिलनाय उत्कण्ठितेन सता श्रेष्ठिनो हट्टं गत्वा रसतुम्बकं याचितम्, परं ताभ्यां कूटमुत्तरं कृतम् । ततो मया कुपितेन कूटस्य फलं दर्शितम्"। अत्रावसरे श्रेष्ठिना चिन्तितम्–'पित्रोर्[3]दुःखकर्ता स

१. मृते । २. सम्मानितः । ३. पितृ–पितृव्ययोः ।

२



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवायं पुरुषः'। इति चिन्तयन् श्रेष्ठी बभाषे-'अग्रे किम्?' सोऽवादीत्-"ततश्चन्द्रावत्या अहमत्रागतः। पैतृकं नगरं शून्यं दृष्ट्वा दुःखतो मध्ये प्रविश्य राजभुवनमाजगाम। तत्र मया विजयानाम्नी भ्रातृजाया दृष्टा। तया आसनादिप्रतिपत्तिः कृता। सा च सर्वं स्वरूपं रुदती सती बभाषे-'अत्र नगरे कोऽपि रक्ताम्बरस्तपस्वी समेतः, स मासे मासे पारणं कुरुते। सोऽन्यदा तव भ्रात्रा पारणाय निमन्त्रितः। तस्य च भोजनं कुर्वतो राजादेशाद् मया वातो व्यञ्जितः। स मां प्रति अनुरक्तचित्तो भुक्त्वा स्थानं गत्वा रात्रौ गोधाप्रयोगेण उपरि मम शयनस्थानं प्राप्तः। मां प्रार्थयामास। मया निषिध्यमानोऽपि स न विरराम। अथ राज्ञा द्वारप्राप्तेन तत्स्वरूपं निशम्य निजपुरुषैः स बन्धितः। पुरमध्ये भ्रमयित्वा लोकैर्हास्यमानो वध्यभूमौ पातितः। स मृत्वा परिणामवशाद् राक्षसोऽभूत्। तेन राक्षसेन पूर्वभवं स्मृत्वा क्रुद्धेन प्रत्यक्षीभूय स्वस्वरूपकथनपूर्वं तव भ्राता चाटूनि वदन्नपि निपातितः। सर्वे जना अपि हन्यमाना भयाद् जीवग्राहं नष्टाः। अहमपि नश्यन्ती तेन दृष्ट्वा स्थापितास्मि। स दिने क्वापि याति, रात्रौ समेति। हे देवर! दैवाद् अहं सङ्कटे पतिता स्थिताऽस्मि, परं त्वं याहि'। इति श्रुत्वा मयोक्तम्—'तस्य किञ्चिद् मर्म प्रकाशय, येन एनं वैरिणं जित्वा स्वं राज्यं पालयामि'। तदा तयोक्तम्-'यदि कोऽपि पुमान् घृतेन तस्य पादाभ्यङ्गं करोति तदा विशेषतो निद्रा समेति, स्त्रीकृताऽभ्यङ्गे तादृशी नायाति निद्रा। अन्यच्च, चरणाभ्याङ्गात् पूर्वं चेद् मानुषं वेत्ति तदा स तं हन्त्येव। अहं च तत्पादाभ्यङ्गं सदैव करोमि'। इत्युक्त्वा तस्यां स्थितायाम् अहं कमपि सहायकं द्रष्टुं चलितोऽस्मि। यदि त्वं सहायको भवसि तदा सहस्रमेव जापं कृत्वा वशीकरणविद्यां स्मृत्वा तं राक्षसं वश्यं करोमि। महान् उपकारस्त्वया कृतो भविष्यति। यतः—



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"दानं वित्ताद् ऋतं वाचः कीर्ति-धर्मौ तथायुषः। परोपकरणं कायाद् असारात् सारमुद्धरेत्" ॥१॥

इति प्रोच्य विजयचन्द्रे स्थिते सति गुणवर्मणा चिन्तितम्-'ममापि पितृमोक्षकार्यं तदा सेत्स्यति यदि अस्य कार्यं सेत्स्यति'। ततस्तेन सहायकत्वे प्रतिपन्ने सति तौ द्वावपि राजभवनं गत्वा, पादाभ्यङ्गसामग्रीं मेलयित्वा, विजयां प्रोच्य गृहमध्ये गुप्तस्थाने स्थितौ। तावता रात्रौ राक्षसः 'क्वापि मानुषो गन्धः' इति ब्रुवंस्तत्रागात्। विजयां प्रोवाच-'भद्रे ! किमु क्वापि मनुष्यस्तिष्ठति ?'। सा ऊचे-'इह अहं मानुषी, अन्यो मानुषसम्भवः कुतः ?' ततः प्रसुप्तस्य राक्षसस्य पादौ वधूमिषाद् दक्षो गुणवर्मा तस्याऽलक्ष्यो निर्भीको गाढं गाढं मर्दयामास। अथ मनुष्यगन्धेन पुनः पुनरुत्तिष्ठन्नपि राक्षसो गुणवर्मणा गाढचरणमर्दनेन स्वापितः। तावता विजयचन्द्रेण सहस्रजापं कृत्वा खड्गं धृत्वा प्रकटीभूय राक्षसो हक्कितः। गुणवर्माऽपि नृवेषं चक्रे। ततस्तौ दृष्ट्वा राक्षस उत्थितोऽपि वशीकरणविद्यया वश एव जातः। प्रोचे च-'भो ! भवतोः किङ्करोऽस्मि। यत् कार्यं तत् कथ्यताम्'। विजयचन्द्रेणोक्तम्-'मदीयं नगरं वासय'। तेन तत्क्षणं सर्वे लोका आनीताः। कलकलायमानं नगरं जातम्। राक्षसेन विजयचन्द्रो राज्येऽभिषिक्तः। ततो विजयचन्द्रेणोक्तम्—'भोः श्रेष्ठिन् ! तवोपकारो महान् जातः। त्वमपि किञ्चित् कार्यं कथय'। गुणवर्मणा स्वस्वरूपं कथितम्। विजयेनोक्तम्-"त्वं किं लोभाकस्य पुत्रः ?। स तु कूटनिधानं, त्वं तु एवंविधः !। परम् उक्तमस्ति—



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"तक्रादिव नवनीतं पङ्कादिव पद्ममम‍ृतमिव जलधेः। मुक्ताफलमिव वंशाद् धर्मःसारं मनुष्यभवात्"

'पङ्कादपि कमलम्' इति सत्यम्"। पुनर्विजयचन्द्रेणोक्तम्–'इदं त्वयैव सेत्स्यति कार्यम्। शृणु–एतन्नगर-प्रत्यासन्ने एकशृंगनाम्नि पर्वते सुगुप्ता कूपिका वर्तते। तन्मध्ये बन्धमोक्षकारकं जलं वर्तते देवताधिष्ठितम्। कूपिकाया द्वयोः पार्श्वयोर्द्वौ पर्वतौ वर्तेते। तौ च नेत्रपद्मे इव मीलनोन्मीलनं कुरुतः, तत्र सलिलग्राही चेद् भीतस्तदा स मृत एव। एतौ द्वौ यदा उद्घटेते तदा यदि पुत्र एव पितुरर्थे कूपिकान्तः प्रविश्य, पानीयमानीय बहिर्निर्गच्छति, तेन च पानीयेन पुत्रो यदि स्वयं बद्धं निजपितरं त्रीन् वारान् आच्छोटयेत् तर्हि बन्धमोक्षो भवेत्। एषा पद्धतिस्त्वयैव सेत्स्यति'। इति विजयोक्तं गुणवर्मणा सर्वं प्रतिपन्नम्। ततो द्वावपि तौ तत्र पर्वते कूपिकापार्श्वे गतौ। पर्वतद्वये विघटिते सति मञ्चिकारज्जुप्रयोगेण मध्ये प्रविश्य गुणवर्मणा निर्भयेन सता तत्पानीयेन पात्रमापूरितम्। ततो विजयेन स बहिर्निष्काशितः। ततस्तौ तुरगरूपं कृत्वोपस्थितं राक्षसमेव आरुह्य शीघ्रं चन्द्रावतीं प्राप्तौ। गुणवर्मणा स्वपिता स्वयं जलेनाच्छोट्य सज्जीकृतः। लोभनन्दी तथैव स्थितः। गुणवर्मणो महोपरोधेन विजयेन तोड्डकस्थानाद् गृहमध्यमानीतः। स तु व्यथार्दितः विरसं रटन् तथैवास्थाद्, यतः पुत्रं विना कथञ्चन बन्धमोक्षो नैवाऽभूत्। ततो गुणवर्मणा रसतुम्बकं विजयाय दत्तम्। तेनापि तुष्टेन तस्मै प्रदत्तम्। एवं विजयस्तदाग्रहात् प्रीत्या कियन्ति दिनानि स्थित्वा स्वस्थानं ययौ। सोऽहं गुणवर्मा लोभाकरस्य पुत्रोऽस्मि। मत्पितृ-पितृव्याभ्यां न्यासापहारकरणाऽपराधः कृतोऽस्ति, हे प्रभो! त्वं क्षमस्व। अन्यः कोऽपि अधिकं न्यूनं वा कथयेद् इति मया स्वस्वामिने विज्ञप्तमस्ति"। ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो वीरधवलेन राज्ञा बहुमानं दत्त्वा श्रेष्ठी विसृष्टो गृहं ययौ। राजा अनपत्यत्वाद् मनसि पुत्रचिन्तया अत्याकुलः सभां विसृज्य आवासमध्ये ययौ। तत्र चम्पकमालया देव्या पृष्टम्-'प्राणेश! किं मुखे विच्छायता?'। राज्ञा तदग्रे गुणवर्मप्रोक्तं वृत्तं कथयित्वा प्रोक्तम्-'प्रिये! पुत्रं विना विजयचन्द्रवत् पितृराज्यं कः पालयति?, गुणवर्मवत् पितुरर्थे स्वजीवं सन्देहे कः पातयति?, लोभाकरमिव को जनकं सज्जं करोति?, अतोऽहमपि अपुत्रत्वाच्चिन्तातुरतया विच्छायोऽस्मि'। देवी प्राह-'प्राणेश! एषा चिन्ता मम प्रासादे सदैव वर्तते, परं न वदामि। सत्यमेवेदम्—

"साहसवंत सुजाण नर जहिं पुत्तूंम न हुंति। थंभ विहूणा गेह जिम धवक्कडइंति पडंति ॥१॥
रमलि करंतो रंगभरि जे नवि देशइ बाल। माणस मानुं ढाढसी किम किम गमैति काल ॥२॥
आंखडीये अणियालडी वयणविकास धरंतु। लहुली करउं जोयतां दीहां जंति तुजं तु" ॥३॥

राजाऽपि प्राह—

नभो दिनेशेन नयेन विक्रमो वनं मृगेन्द्रेण निशीथमिन्दुना।
प्रतापलक्ष्मीबल-कान्तिशालिना विना न पुत्रेण विभाति नः कुलम् ॥१॥

ततो देव्या प्रोक्तम्-'कोऽपि सप्रत्ययो देव आराध्यते। ततः पुत्रप्राप्तिः स्यात्। यतः—





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः। उद्यमात् कृमिकोटोऽपि भिनत्ति महतो द्रुमान्"॥१॥

राज्ञा प्रोक्तम्–'भव्यमुक्तं, मन्त्रिषु राज्यभारं निवेश्य त्वया सह कमपि देवम् आराधयिष्यामि'। यावत् तौ इति वार्तां कुरुतस्तावद् देव्या दक्षिणनेत्रं स्फुरितम्, साऽत्याकुला अभूत्। राज्ञोक्तम्–'देवि! किं ते जातम्?'। सा प्राह–'प्राणेश! न जाने किमपि भावि! शरीरे कुचेष्टा अरतिश्च मृत्यवे महाकष्टाय वा विचार्यते'। राजा प्राह–'यद् भावि तद् भवतु, मम जीवितं मरणं वा त्वयैव सह, मा खेदं कुरु'। इत्युक्त्वा भोजनाय उत्तस्थौ। भुक्त्वा क्षणं विश्रम्य राजा सभां भूषयति स्म। 'किं भावि?' इति देवीस्वरूपं चिन्तयति तावता काऽपि चेटी रुदती शीघ्रं समेत्य गद्गदस्वरेण नृपं प्रति प्राह–'हे प्रभो! देवी चम्पकमाला गृहे गृहवाटिकायाम् अन्यत्र च क्वापि धृतिमलभमाना आगत्य पल्यङ्के निविष्टा। तया च अहं पत्रार्थं प्रेषिता। यावद् आगत्य पश्यामि तावता देवी पल्यङ्के सुप्ता दृष्टा। परं न वक्ति, न च चेष्टां कुरुते। जाने किं जातम्?'। राजा तच्छ्रुत्वा अत्याकुलः समुत्थाय स्खलत्पादः शीघ्रमावासान्तर्ययौ। वैद्य-ज्योतिषिकादयो मिलिताः, बहवः प्रतीकाराः प्रारब्धाः, परं सर्वेऽपि वृथैव जाताः। काष्ठतुल्यामेव तां दृष्ट्वा सर्वे वैद्या निराशा जाताः। तत एकान्ते मिलित्वा मन्त्रिणोऽन्योन्यं प्रोचुः– 'किमिदम्?, कथमस्याः प्राणा एव गताः?। प्रियास्नेहेन भूपोऽपि मरिष्यति अपुत्रः' पृथ्वी निराधारा भविष्यति' तदा सुबुद्धिमन्त्रिणोक्तम्–'कथञ्चिद् राजा कालविलम्बं कार्यते विषविकारकथनेन'। इति विमृश्य तैस्तथैवोक्तं नृपाग्रे। राजा हृष्टोऽवादीत्–'तदा जितं जितम्!, अरे! मणीन् मान्त्रिकांश्च आनयत'। एवं प्रतीकारेषु क्रियमाणेषु देवीम्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकान्ते स्थापयित्वा दिनशेषं रात्रिं च अतिक्रमयमासुः। प्रातर्भूपो देवीं तादृशामेव दृष्ट्वा 'मृतैव' इति मत्वा मूर्च्छितः, चन्दनजलेन सिक्तः सचेतनो बाढं विललाप। विलप्य मन्त्रिणः प्रति प्राह–'भो ! गोलानदीतटे चितां रचयत, अहमपि देव्या सह अग्निं प्रवेक्ष्यामि'। मन्त्रिणो रुदन्तः पादयोर्लगित्वा प्राहुः–'प्रभो ! केयम् अधीरता ? त्वयि विनष्टे सर्वं विसंस्थुलं राज्यसूत्रं विभाति !'। राज्ञोक्तम्–'यद् भावि तद् भवतु, परं मया तु अस्या अग्रे जीवनं मरणं च सहैव प्रतिपन्नम्'। एवं सर्वं परिज्ञाप्य मृतदेवीशिबिकया सार्धं राजा चचाल। पौरलोका उरस्ताडं रुदन्ति स्म। नृपस्य परिच्छदो नदीतटं प्राप। तत्र चिता स्थापिता। राज्ञा स्नानं कृतम्। अन्येऽपि बहवोऽग्निप्रवेशाय सज्जीभूताः।

तस्मिन्नवरे प्रवाहपतितं बन्धनैर्बद्धं महत् स्थूलं काष्ठमेकमागच्छद् दृष्टम्। मन्त्रिभिस्तारका भाषिताः–'भोः ! काष्ठमेतत् कृषत, चिताकाष्ठेषु कार्ये समेति'। तैस्तत् काष्ठं जलाद् बहिरानीतम्। राज्ञि लोके च पश्यति सति बन्धेभ्यश्छोटितम्। ततः सम्पुटसदृशं तद् दृष्टम्। सम्पुटेऽपि विघटिते सति सर्वाङ्गविलिप्ता दिव्यपुष्पमालाश्चिता दिव्यहारभूषिता देवी चम्पकमाला निद्रां प्राप्ता दृष्टा। 'अहो ! चित्रं चित्रम् !' इति सर्वेऽप्यवादीत्। राजाऽपि विस्मयं प्राप्तः प्राह–'भोः। शवस्थानं वीक्ष्यताम्'। तैस्तत्र गत्वा सा शिबिका यावद् उद्घाटिता तावता शबं हस्तौ घर्षयद्, दन्तैर्दन्तान् पिषद्, अट्टाट्टहासं कुर्वद् नभसा उड्डीय जगाम। ते भयभ्रान्तास्तत्स्वरूपं नृपाग्रे प्रोचुः। ततो देवी प्रबुद्धा सती उन्मीलितलोचना जाता। राजा प्रमोदभरभासुरो जातः। देवी प्रोत्थाय प्राह–'प्राणेश !



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं यूयमत्र ?, किं छिन्नानि वस्त्राणि ?, को वा मृतः ?' । राजा प्राह–'सर्वं कथयिष्यते, परं त्वं स्वस्वरूपं निवेदय'। ततः सर्वः कोऽपि वटवृक्षतले निविष्टः । अथ राज्ञी वक्तुं प्रवृत्ता–"हे नाथ ! मदीयं दक्षिणनेत्रं स्फुरितम् इति त्वमपि जानासि । ततोऽहं वने भवने च क्वापि रतिमप्राप्ता पल्यङ्के सुप्ता । सखी पत्रार्थं प्रहिता । यावत् किञ्चिद् निद्रा समेति तावत् केनाप्युत्पाटिता, क्वाऽपि च शृङ्गे मुक्ता । स च दुष्टो मुक्त्वा मयि पश्यन्त्यामेव क्वापि गतः । अहं शिलातलादुत्थाय मनसि विविधां चिन्तां कुर्वाणा दिशामेकां गृहीत्वा प्रस्थिता । अग्रे जिनमन्दिरं दृष्ट्वा मध्ये गता । तत्र श्रीऋषभप्रभुः स्तुतः–

"अहो ! अमेघजा वृष्टिः अहोऽकुसुमजं फलम् । अहो ! पुराकृतं पुण्यं यद् दृष्टो नाथ ! लोचनैः ॥१॥

नमस्तुभ्यं जगन्नाथ ! त्रैलोक्याम्भोजभास्कर ! संसारमरुकल्पद्रो ! विश्वोद्धरणबान्धव ! ॥२॥

देव ! त्वं दुःखदावाग्नितप्तानामेकवारिदः । मोहान्धकारमूढानामेकदीपस्त्वमेव हि ॥३॥

त्वां ध्यायन्तः स्तुवन्तश्च पूजयन्तश्च देहिनः । धन्यास्ते जगृहुर्देहाद् मनो-वाग्-वपुषां फलम् ॥४॥

"एवं मयि स्तुवत्यां काऽपि दिव्यरूपा स्त्री समेता । मां प्राह–'हे सुन्दरि ! श्रीऋषभदेवस्याहं शासनदेवता चक्रेश्वरी देवी तव जिनभक्त्या तुष्टाऽस्मि' । मया प्रोक्तम्–'तर्हि कथय केन कुत्राऽहम् आनीतास्मि ?' । साऽवादीत् "शृणु, चन्द्रावतीशवीरधवलस्य त्वत्प्रियस्य वीरपालो भ्राताऽभूत् । स राज्यलुब्धो नृपं हन्तुमिच्छति । अन्यदा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



घातकीभूय भूपस्य मन्दिरे प्रविष्टो नृपं प्रति शस्त्रीप्रहारं मुमोच। राज्ञा प्रहारं वञ्चयित्वा स एव हतः। मृत्वा प्रचण्डनामा ममाऽनुचरो भूतोऽभूत्। स पूर्ववैरं स्मृत्वा वीरधवलोपरि द्वेषं धत्ते, परं तस्य पुण्यस्य प्रभावतश्छलं न लभते। ततश्चिन्तितं तेन–"[1]देव्यां प्रेमबन्धोऽस्य बाढमस्ति इति तामेव हरामि, ततः स्वयमेवासौ मरिष्यति'। इति ध्यात्वा छलं प्राप्य तेन भूतेन हृत्वा अत्र मलयपर्वते त्वं मुक्ताऽसि। स पुनश्चन्द्रावत्यां गत्वा तव शयनीये मृतकरूपं कृत्वा स्थितोऽस्ति। राजा त्वद्रूपं दृष्ट्वा महादुःखं प्राप्तोऽस्ति"। मया प्रोक्तम्–'हे देवि! कथय, मम जीवन्त्याः पुनर्भूपतिमिलनं भविष्यति ?'। सा प्राह–'सप्त प्रहरान् यावत् तव तस्य च वियोगो भावी'। पुनर्देवी मां प्राह—'देवदर्शनं निष्फलं न स्याद्, अतः किञ्चिद् याचस्व'। मयोक्तम्–'मम अपत्यं नास्ति'। तयोक्तम्–पुत्र-पुत्रीरूपं युगलं ते भावि। इयन्ति दिनानि तेन भूतेन सन्ततिरोधः कृतोऽभूत्। अथ तं भूतं भवतोरुपद्रवं कुर्वन्तं निवारयिष्यामि। अहमत्रैव पर्वते प्रभुभक्त्या तिष्ठामि, 'मलया' इति द्वितीयं नाम बिभर्मि। इमं लक्ष्मी-पुञ्जाभिधं हारं गृहाण। महाप्रभावोऽस्यास्ति'। इत्युक्त्वा मम कण्ठे सा हारं चिक्षेप। यावदहं किञ्चित् पुनः पृच्छामि तावद् एका खेचरी चेटीयुक्ता प्राप्ता, चक्रेश्वरी च अदृष्टाऽभूत्। खेचरी मां प्रति प्राह–'सुन्दरि! का त्वम् ?'। मयाऽश्रूणि मुञ्चन्त्या स्वस्वरूपं कथितम्। साऽवादीद्–'अहमत्र विद्यां साधयितुं प्राप्ताऽस्मि। परं तव दुःखिताया उपकारम् अकृत्वा मम विद्यासिद्धिर्न भवेत्। मम भर्ता च क्षणान्तरे समेष्यति, स त्वां सुरूपां दृष्ट्वा

---

१ चम्पकमालायाम्।





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शीलं खण्डयिष्यति, मम च सपत्नीजं दुःखं भावि। अत आगच्छ, यथा ते किञ्चिद् भव्यं करोमि'। इत्युक्त्वा बाहौ धृत्वा नदीतीरं नीता। 'एषा मे किं करिष्यति?' इति ध्यायन्त्या मम शरीरे सर्वत्र चन्दनलेपः कृतः, पुष्पमाला चारोपिता। तत्र महत्काष्ठमेकं विद्याशक्त्या विदार्य सम्पुटद्वयं चक्रे। एकस्मिन्नहं स्थापिता, द्वितीयम् उपरि दत्तम्। ततः परं गर्भस्थिता इव न जाने किमपि जातम्। यूयमेवात्र दृष्टाः"।

तदा सुबुद्धिमन्त्रिणा प्रोक्तम्–'नूनं खेचर्या स्वस्याः सपत्नीशङ्कया स्वामिनी काष्ठमध्ये निक्षिप्य पर्वतोत्तर-नदीप्रवाहे प्रेरिता। आत्मीयपुण्यप्रभावाद् अत्रैव प्राप्ता'। ततो राज्ञा दुःखस्वरूपं कथितम्। अथ राजा तत्का-ष्ठफालीद्वयं गोलातटे भट्टारिकादेवीगृहे मोचयित्वा, भद्रहस्तिनीमारुह्य, देवीं वामपार्श्वे निवेश्य, छत्रं ध्रियमाणो, वाद्येषु वाद्यमानेषु, महोत्सवेषु जायमानेषु ध्वजपटभूषितं पुरं प्रविवेश। सौधं समेतः। वर्धापनानि जातानि। तस्मिन्नेव निशीथे देवी गर्भं दधौ। पूर्णेषु दिनेषु पुत्र-पुत्रीरूपं युगलं जातम्। राज्ञा महोत्सवाः कारिताः। नामकरणदिवसे सर्वजनानां पुरतो भोजनानन्तरं प्रोक्तम्—'मलयादेव्या इदं युगल दत्तमिति तस्या एव नाम्ना नाम दीयते'। इत्युक्त्वा पुत्रस्य 'मलयकेतुः' पुत्र्याश्च 'मलयसुन्दरी' इति नाम दत्तम्। अथ वर्धमानौ तौ माता-पित्रोर्विश्वस्यापि च प्रीतिहेतवे जातौ। समये पण्डितसमीपे स्थापितौ। स्तोककालेनापि सर्वकलापारीणौ जातौ। 

॥ इति श्रीअञ्चलगच्छे श्रीमाणिक्यसुन्दरसूरिकृतायां मलयसुन्दरीकथायां मलयसुन्दरी-
जन्मवर्णनो नाम प्रथम उल्लासः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# ॥ अथ द्वितीय उल्लासः ॥

अथ सा मलयसुन्दरी यौवनं वनं संश्रिता कल्पलतेव कामपि अवक्तव्यां लीलां बभार। इतश्च, अत्रैव भरतेऽङ्गदेशे पृथ्वीस्थानं नाम नगरम्। तत्र यशःपूरबन्धुरः सूरपालः पृथ्वीपतिः। तस्य पद्मावती प्रिया। तत्कुक्षि-समुद्भूतः प्रभूतगुणो महाबलो नाम कुमारः। स सर्वकलाकुशलस्तारुण्यं प्राप। अन्यदा कोऽपि सिद्धपुरुषस्तस्य सङ्गतः। कुमारेणावर्जितः। तेन रूपपरावर्तकारकाः पुनः स्वरूपकारकाश्च औषधयोगा उपदिष्टाः। कुमारेण तान् योगान् मेलयित्वा गुटिकाः कृत्वा मुक्ताः। सिद्धो ना[1] विसृष्टः। अन्यदा सूरपालेन राज्ञा स्वप्रधानपुरुषाः कस्मैचित् कार्याय चन्द्रावतीं पुरीं प्रति गमनायादिष्टाः। तदा महाबलकुमारेण देशवीक्षणाय राजा विज्ञप्तः। आग्रहेण च पितरं मातरं च परिज्ञाप्य तैः सह चलितश्चन्द्रावतीं ययौ। गुप्तवृत्त्यैव तिष्ठन् तैः सह वीरधवलनृपसभां गतः। राज्ञा ते सम्मानिताः। पृष्टं च–'कोऽयं सदाकारः[2] कुमारः?'। एकेन केनचित् प्रोक्तम्–'ममायं भ्राता'। ततः सर्वेऽप्युत्थिताः। उत्तारकस्थानं प्राप्ताः। अथ कुमारः स्वल्पपरिकरः पुरं विलोकयन् मलयसुन्दरीगृहसत्कगवाक्षस्याधः प्राप्तः। तदा कुमारी गवाक्षान्तिकस्थितं रूपनिर्जितमकरध्वजं[3] वीक्ष्य मनसि चिन्तयामास—

१ नरः। २ सुन्दराकारः। ३ सुरूपविजितकामदेवम्।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहो! लावण्यलीलाऽस्य कटाक्षं रूपमद्भुतम्। सा धन्या मन्यते कन्या यस्या भर्ता भवेदसौ॥१॥

एवं चिन्तयन्तीं निर्निमेषदृशा च पश्यन्तीं कुमारोऽपि सहसा ददर्श। दध्यौ च—

केयं किं देवता कापि मानवोत्वं समागता? परिणीताऽथवा कन्या? लावण्यामृतवाहिनी॥१॥

तस्मिन्नेवं चिन्तयति सति सा कुमारी च्छेकतया[1] कागदे स्वरूपं लिखित्वा तत्सम्मुखं चिक्षेप। सोऽपि तं वाचयामास-'अहं श्रीवीरधवलपुत्री मलयसुन्दरी कन्याऽस्मि। त्वां दृष्ट्वा त्वामेव वरम् अभिलषामि'। इति वाचयन्तं कोऽपि त्वरितमागत्य तदीयमर्त्यो बभाषे-'कुमार! शीघ्रमागम्यताम्। सार्थश्चलति, तस्मात् शीघ्रमागम्यताम्'। ततः कुमारस्तेन सहितः पश्चाद् विलोकयन् स्थानं ययौ। ततो मन्त्रिणां सज्जतां कुर्वतामेव रात्रिमुखं जातम्। 'अथ अर्धरात्रिमतिक्रम्य चलिष्यते' इति वार्तां मन्त्रिषु कुर्वत्सु कुमारेण चिन्तितम्-'तया तु च्छेकतया निजस्वरूपं ज्ञापितं, परं मया तस्याश्चेतसि [2]निर्वृतिमनुत्पाद्य कथं गम्यते?, अत एकदा तत्र गन्तव्यमेव'। इति विचिन्त्य कुमारः शीघ्रं राजभुवनमागम्य विद्युदुत्क्षेपकरणेन प्राकारमुल्लङ्घ्य मध्यमाजगाम। तत्रासौ नृपवल्लभया कनकवत्या[3] दृष्टः। प्रोक्तश्च-'कस्त्वं भोः?'। तेनोक्तम्-'अहं लेखहारको मलयसुन्दर्याः, लेखं दास्यामि ताम्, सा क्वास्ति?'। तयोक्तम्—'क्षणमत्र विश्रम्यताम्, अयमपि जनस्तव भक्तिकारकोऽस्तु!'। तेनोक्तम्—'लेखमर्पयित्वा वलितः सर्वं रम्यं विधास्ये'। ततस्तया दर्शितो मार्गः। अग्रे गत्वा उपरितनाऽपवरकान्तस्थितां योगिनीमिव

१ चातुर्येण। २ शान्तिम्। ३ मलयसुन्दरीमातुः सपत्न्या।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तमेव हृदि मन्त्रसदृशं स्मरन्तीं तां कन्यां स ददर्श। साऽपि सानन्दा तं दृष्ट्वा सहसोत्तस्थौ। आसनं दत्त्वा तमूचे—'अहो ते धीरता!। कथमत्र सुरक्षिते स्थाने समागमनं जातम्?'। सोऽवादीत्—

"उत्कटकण्टके कोटघर्षणकष्टानि हृदि न चिन्तयति।
असदृशरसविवशमतिर्विशत्यलिः केतकीकुसुमम्" ॥१॥

"त्वया च स्वस्वरूपमुक्तम्। मदीयं श्रृणु-अहं पृथ्वीस्थानपुरे सूरपालनृपस्य पुत्रः पद्मावतीकुक्षिजातो महाबलाभिधानोऽस्मि"। साऽवादीत्-'तर्हि यदा त्वं पूर्वं मया दृष्टस्तदैव पूर्वभवसम्बन्धेन केनापि प्रेरितया मनःसाक्ष्यं वृतोऽसि। साम्प्रतं गान्धर्वविवाहेन अङ्गीकुरुष्व'। तदा तेनोक्तम्–'कुलकन्यानां प्रच्छन्नो[1] विवाहो न शोभते, इति धीरत्वं भज। अहं तथोपक्रमं[2] करिष्ये यथा स्तोकदिनैः पितृदत्तां त्वां परिणेष्यामि।

"विधत्ते यद्विधिस्तत् स्याद् न स्याद् हृदयचिन्तितम्।
एवमेवोत्सुकं चित्तमुपायांश्चिन्तयेद् बहून्" ॥ १ ॥

अयं श्लोकस्त्वया चिन्तानिवारणाय सदा चिन्त्यः'। तया प्रपन्नम्। यावद् एवं तौ प्रीत्या वार्तां कुरुतस्तावता कनकवती द्वारपार्श्वस्थिता प्रच्छन्नं सर्वं तच्छ्रुत्वा कपाटद्वयमाकृष्य तालकं ददौ। सा च कुमार्या

१. गुप्तः। २. उपक्रमम्-आरम्भम्-उपायम्।





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्टा उपलक्षिता च । कुमारेणोक्तम्–'कोऽयं किं करोति ?' तया भीतया प्रोक्तम्–'हा ! प्रमादो जातः । एषा मेऽपरमाता वार्तां श्रृण्वती न ज्ञाता ! । ज्ञायते किमपि भावि !' । अथ कनकवत्या तत्स्वरूपं समधिकं राज्ञोऽग्रे कथितम् । राजा रक्षकैः सह द्वारे समेतः । तदा कुमारी कम्पमानाङ्गी कुमारं प्रति प्राह– 'दैवेन किं कृतम् ? । मुधा त्वादृशस्य नररत्नस्य महाकष्टमुपस्थितम् । किं क्रियते ?, क्व गम्यते ?, द्वारमेव रुद्धम्' । कुमारेणोक्तम्–'मा भैषीः, भव्यमेव भावि' । इत्युक्त्वा 'एतन्मातुः सदृशं रूपं मे भवतु' इति ध्यात्वा मिलितयोगगुटिका शीर्षाल्लात्वा मुखे क्षिप्ता । तत्क्षणं स चम्पकमालादेवीसदृशरूपो जातः । राजा तालकं भङ्क्त्वा मध्ये प्रविष्टः । तत्र च अभ्युत्थानं सहसा कुर्वती मातृसहिता कुमारी दृष्टा । राजा विस्मितः । कनकवतीं वीक्ष्य शिरो धूनितम् । साऽसत्यवादिनी लज्जयाऽधोमुखी बभूव ! । आरक्षकादिकैरपि सा हसिता गता । राजापि स्वस्थानं प्राप । सर्वेषु गतेषु सत्सु कुमारः स्वस्वरूपं पुनः कृत्वा तां प्रति प्राह–'अथाहं गच्छामि' । तदा तया लक्ष्मीपुञ्जहारो गलादुत्तार्य तत्कण्ठे क्षिप्तः, 'एषा मे वरमाला ज्ञेया' इत्युक्तं च । 'सुखिनः सन्तु ते पन्थानः' इति तया विसृष्टः । ततो निर्गत्य स्वसार्थे मिलितः स्वनगरं ययौ । अथ कनकवती 'कूट-वादिनी' इति सर्वैरपि निन्दिताऽचिन्तयत्–'किमयं कोऽपि मे भ्रमोऽभूत् ?, कुमार्यैव वा किमपि कपटं कृतम् ?' । इति चिन्तयती सा कुमारीं प्रति द्वेषवती बभूव । अथ कुमारः स्वपुरं प्राप्तस्तं हारं पितुरढौकयत् । 'केनायं दत्तः ?' इति पित्रोक्ते 'वीरधवलपुत्रेण दत्तः' इत्युक्तम् । तेनापि पद्मावतीदेव्यै दत्तः । अन्यदा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुमारेण स हारः स्वकण्ठे न्यवेशि । अथ कदाचित् कुमारेण तातं प्रणम्य पार्श्वे निविष्टे सति प्रतिहारनिवेदितः चन्द्रावतीशदूतः समेतः । स पृथ्वीपतिं प्रणम्य प्राह—"हे नरेन्द्र ! श्रीवीरधवलस्य अस्मत्स्वामिनो मलयसुन्दरी कन्याऽस्ति, सा सकलकलापात्रम् । 'यो वज्रसाराभिधानं धनुरारोपयिष्यति स तां परिणेष्यति' इति प्रतिज्ञया तत्कृते राज्ञा स्वयंवरः कारितः । सर्वे राजान आहूताः सन्ति । अद्य ज्येष्ठस्य कृष्णैकादशी, आगामिन्यां चतुर्दश्यां स्वयंवरो भावी । मम चलितस्य बहवो दिना अभूवन्, परं मार्गे मन्दीभूतस्तेन विलम्बोऽभूत् । अथ विलम्बो न सहते, कुमारः शीघ्रमादिश्यताम्, तथा च आगत्य तां कुमारीं परिणयेत्"। राजा तच्छ्रुत्वा हृष्टो दूतं वस्त्रादिभिः सत्कृत्य व्यसर्जयत् । कुमारोऽचिन्तयत्—'मयेति ध्यायमानमासीत्-तां कथं पितृदत्तां परिणेष्यामि ?, परं दैवमनुकूलमस्ति'। इति चिन्तयन्तं कुमारं प्रति राजा प्राह—'हे वत्स ! सज्जीभव, सैन्यं च सज्जय । अद्यैव निशि प्रयाणं कुरु । लक्ष्मीपुञ्जहारः सार्धे ग्राह्यः'। कुमारेण करौ शीर्षे कृत्वा प्रोक्तम्-"तातादेशः प्रमाणं, परम् एका वार्ता विज्ञप्याऽस्ति—निशि मम सुप्तस्य सतः कोऽपि भूतोऽन्यो वा वस्त्रम् आभरणं वा हृत्वा याति । अद्य तु लक्ष्मीपुञ्जहारोऽपि हृतः । मम मातापि हारं गतं श्रुत्वा दूनाऽस्ति । मयोक्तम्—'मातः ! पञ्चदिनमध्ये चेद् हारं न ददे तदाऽग्निं साधयामि'। मम मात्रापि भणितम्—'यदि हारो नाऽऽयास्यति तदा मया मर्तव्यमेव' ततोऽहं रात्रौ शयनस्थाने प्रहरकं दास्ये, यः कश्चिद् भूतो राक्षसो वा प्राग्भववैरी समेष्यति तत्स्वरूपं विलोक्य, तं विजित्य, हारं च गृहीत्वा पाश्चात्यरात्रौ चलिष्यामि"।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्युक्त्वा कुमारः स्वस्थानं गत्वा, रात्रौ खड्गमादाय, दीपच्छायामाश्रित्य स्थितः । अर्धरात्रे गवाक्षमार्गेण एकः करः प्राप्तः । स च इतस्ततः परिभ्रमति स्म । कुमारेण चिन्तितम्— 'कङ्कणभूषितः कस्याश्चिद् देवतायाः करोऽयं घटते, सा अदृशाऽस्ति, यद्यत्र हस्ते प्रहारं दास्ये तदा सा यास्यति । परं हस्तमेव आरोहामि' । इति ध्यात्वा तमेव आरुरोह । हस्तारूढो गगने चचाल । तं पातयितुं हस्तेऽत्यर्थं कम्पमाने सति द्वाभ्यां हस्ताभ्यां बाढतरं हस्तं गृहीत्वा स्थितः । अग्रे देवी काचिद् रोषारुणनेत्रा प्रत्यक्षीभूता । कुमारेण साहसं धृत्वा सा मुष्टिप्रहारेण हता । तत आरटन्ती दीनवदना करुणस्वरं मुहुर्मुहुरवदत्—'कृपानिधे ! मुञ्च मुञ्च' । अथ कारुण्यात् कुमारेण आशु सुरी कराद् मुक्ता । सा देवी नष्टा । कुमारोऽम्बरात् पतितः, परं कस्यचित् सहकारस्योपरि प्राप्तः, तेन शरीरे तादृक् पीडा नाभूत् । यावत्तत्र स्थितो विविधचिन्तासमुद्रे पतितो दैवोपालम्भान् दत्ते तावत् कोऽपि महान् अजगरः भूघर्षणशब्दं कुर्वन् वृक्षमूलमागच्छन् शब्दानुसारेण ज्ञातः, दृष्टश्च । चिन्तितं तेन—'नूनम् अनेन कोऽपि जीवो गिलितः, तं च हन्तुं वृक्षस्कन्धे आस्फालयितुमागच्छति । तत एनं विदार्य गिलितं मनुष्यादिकं बहिष्करोमि' । इति ध्यात्वा वृक्षादुत्तीर्य वृक्षतले निश्चलतया स्थितः । यावताऽजगरो वृक्षस्कन्धे वेष्टनं कर्तुं लग्नस्तावता कुमारेण तस्यौष्ठपुटं गृहीत्वा बलाद् यत्नेन विदारितः । तन्मध्याद् एका स्त्री निर्गता अचैतन्येऽपि 'महाबलो मे शरणम्' इति जल्पन्ती । कुमारः स्वनामश्रवणेन विस्मितः । 'केयम् ?' इति विशेषतस्तस्या मुखं पश्यन् मलयसुन्दर्याः सदृशं दृष्ट्वा महतादरेण वायुं विजयति स्म । ॥ २० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सा च किञ्चित् सचेतना कुमारोक्तं श्लोकं पपाठ । तदा तु तस्य चित्ते कुमारीनिश्चये सति महत्कौतुकं जातम् । सापि समुन्मीलितलोचना शनैः शनैः सावधाना कुमारमुपलक्ष्य लज्जावती बभूव । ऊचे च—' प्राणेश ! त्वं कुतः ?' तेनोक्तम्—' पूर्वम् आसन्ननदीजले शरीरं क्षालय, पश्चात् परस्परं कथ्यते स्वरूपम् ' । ततस्तौ नद्यां गत्वा शरीरं क्षालयित्वा तत्रायातौ । कुमारेण स्वस्वरूपे कथिते कुमारी शिरो धूनयति स्म, विषमा दैवगतिः ! ।

॥ २१ ॥ अथ कुमारः प्राह—' त्वं तत्र सुरक्षिते स्थाने वसन्ती कथमजगरोदरं गताऽसि ?' । सा यावत् किञ्चिद् वक्तुमारभते तावत् कुमारेण तत्र प्रत्यासन्ने मनुष्यसञ्चारं ज्ञात्वा कुमारीं प्रत्युक्तम्–' क्षणं मौनेन तिष्ठ । कोऽपि तस्करः पारदारिको द्यूतकारो वा रात्रौ सञ्चरन्नत्र आयाति ' । ततः कुमारेण शीर्षाद् गुटिका आकृष्य आम्ररसेन घृष्टा । ततः कुमार्या भाले तिलके कृते पुरुषरूपां जातां दृष्ट्वा तां प्रत्युक्तम्–' यावदहं निष्ठ्युतेन तिलकमिदं न प्रमार्जयिष्ये तावत् त्वं पुरुषरूपैव द्रक्ष्यसे ' । एवं तौ यावत्तत्र निश्चलौ स्थितौ तावत् तत्रैका स्त्री कम्पमानाङ्गी तौ दृष्ट्वा च विशेषतश्चकिता समेता । कुमारेण भाषिता–' भद्रे ! का त्वं ? किं भीतेव दृश्यसे ? । आवां पथिकौ, किञ्चिन्न जानीवस्ततः पृच्छ्यते ' । सा प्राह—" भोः क्षत्रियौ ! एषा गोला नदी । अत्रासन्ना चन्द्रावती पुरी । तत्र वीरधवलो नाम राजा । तस्य मलयसुन्दरी कन्याऽस्ति । तस्या अपरमाता कनकवती तां प्रति मात्सर्यं धत्ते । अहं च तस्या महेल्लिका[1] सोमाभिधानाऽस्मि । दिनत्रयात् पूर्वं

१. अन्तःपुरचरा–दासी ॥





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रात्रौ मयि समीपे स्थितायां लक्ष्मीपुञ्जनामा हारः कनकवतीकण्ठेऽपतत् । कौतुकेन तया मया च आकाशे वीक्षितम् , परं न कोऽपि क्षेप्ता दृष्टः । ततस्तयाऽहं भणिता–'कस्यापि हारस्वरूपं न प्रकाश्यम्'। मया प्रपन्नम् । ततः सा हारं संगोप्य तदैव महासाहसयुक्ता मया सह श्रीवीरधवलपार्श्वं गता । प्रोचे च–"प्राणेश ! किमपि वक्तुं प्राप्ताऽस्मि, अवसरे विलम्बो न युक्तः । शृणु, पृथ्वीस्थानपुरे सूरपालो राजा, तस्य महाबलः पुत्रः । तस्य मानुषमेकैकं मलयसुन्दरीपार्श्वे समेति । एतया लक्ष्मीपुञ्जहारस्तस्मै दत्तोऽस्ति । इति कथापितं च–'त्वया सर्वसैन्येन स्वयंवरे समेतव्यम् , तत्र स्वजनराजानोऽपि बहवो मिलिष्यन्ति । त्वयेदं राज्यं ग्राह्यं, अहं च परिणेतव्या, हारप्रभावेण सर्वं सेत्स्यति'। एषा मुग्धा दृश्यते, परं चरित्रं विषममस्ति ! । मया सम्यग् ज्ञात्वा हितार्थं कथितमस्ति । चेन्न विश्वासस्तदा हार एव याच्यताम्" । इत्युक्त्वा राजानं कोपाकुलं कृत्वा गता । राज्ञा तदा चम्पकमालामाहूय सा वार्ता प्रोक्ता । तयाऽप्युक्तम्–'यदि हारं न दत्ते तदा सर्वं सत्यमेव'। कन्यापि तदैव आहूता । हारे याचिते सा चकितचित्ता आह–'तात ! हारो मत्पार्श्वे नास्ति, स केनापि अपहृतः'। तदा राज्ञा कनकवत्याः कथितं सत्यमेव मन्यमानेन रुष्टचेतसा प्रोक्तम्–'रे पापे ! स्वं मुखं मा दर्शय'। सा गता । राज्ञा चिन्तया रात्रिरतिक्रान्ता । प्रातस्तलारक्षमाहूय प्रोक्तम्–'भो ! मलयसुन्दरीं गृहीत्वा वध्यभूमौ निपातय'। इति श्रुत्वा विस्मितो दुःखितो 'राजादेशः प्रमाणम्' इति वदन् गत्वा कन्यां प्रति रुदन् प्राह । साऽपि श्रुत्वा व्याकुलचिता 'किं मया विनाशितम् ?' इत्यादि जल्पन्ती समुत्थिता ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सख्योऽपि रुदत्यः पृष्ठतो लग्नाः । तां रुदतीं स्खलत्पादां दृष्ट्वा रक्षकेण गत्वा राज्ञः प्रोक्तम्–'देव ! कथमेवं स्त्रीहत्या गृह्यते ?, सा च एकशस्तवाग्रे किमपि विज्ञपयितुमायाति'। राज्ञोक्तम्–'सा मम दृष्टौ मा आया-सीत्, परं यदि स्त्रीहत्या चिन्त्यते तदा सा स्वयमेव पातालमूलनाम्नि अन्धकूपे पततु । यदि न पतति तदा यथा तथा विनाश्यैव'। इति राजादेशं प्राप्य रक्षकः कुमार्यै कथयामास । ततः सा 'हा मातः ! हा तात ! हा मलयकेतुभ्रातः ! कथं निरपराधा हन्यमानाऽस्मि ?' इति विलपन्ती लोकेषु शोकाकुलेषु रक्षकवृताऽ-न्धकूपसमीपं गता । 'सर्वज्ञः शरणम्, महाबलश्च मे शरणम्' इति वदन्ती विद्युज्झात्कारं दर्शयन्ती कूपे झम्पां ददौ । सर्वः कोऽपि 'हा हा !' कुर्वन् स्वस्थानं ययौ । राज्ञी राजा च हृष्टौ । रात्रौ राज्ञा मन्त्रिण-माहूयः प्रोक्तम्—"सा[2] तावद् दुष्टा मृता । अथ स्वयंवरार्थमाहूता राजानो निषिध्यन्ते । 'अकस्मात् कन्या मृता' इति ज्ञाप्यते । अत्रार्थे हितकारिणी कनकवत्यपि पृच्छ्यते"। इत्युक्त्वा मन्त्रिणा सह तद्गृहं ययौ । द्वारं दत्तं दृष्ट्वा कुञ्चिकाच्छिद्रेण यावत् पश्यति तावता तां कनकवतीं हर्षेण हस्ते गृहीत्वा तमेव हारं प्रति इति वदन्तीं ददर्श—'हे हार ! त्वं महाभाग्येन मम करे चटितोऽसि । त्वत्प्रसादेन पूर्वभववैरिणी सा मलय-सुन्दरी भव्यं निपातिता[3]ऽस्ति !' इति श्रुत्वा राजा 'वञ्चितोऽस्मि' इति वदन् मूर्च्छितः पपात । सर्वे लोका मिलिताः । चन्दनजलैः सिक्तः सचेतनः कपाटद्वयं हस्ताभ्यां कुट्टयन् बभाषे—'रे ! पापिन्या हारं स्वयं

१. कनकवती । २ मलयसुन्दरी । ३ मारिता ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गृहीत्वा सा गुणमयी पुत्री विनाशिता'। तदा कनकवती तत्सकलस्वरूपं ज्ञात्वा भयाद् मया सह गवाक्षमार्गेण झम्पां दत्त्वा नष्टा। तत आवाभ्यां देवकुलस्थिताभ्यां लोकमुखादिति श्रुतम्—"राजा कपाटं भित्त्वा मध्ये प्रविष्टः। ताम् अदृष्ट्वा 'पापिनी नष्टा' इति वदन् हस्तौ ममर्द। तत्कालं च अन्धकूपके गत्वा मध्ये पुरुषान् प्रक्षिप्य कुमारीं शोधयामास। परं सा कन्या क्वापि न लब्धा। 'नूनं केनापि जीवेन भक्षिता' इति प्रलपन् प्राह—'भो भटा! धावत धावत, सा कनकवती कुतोऽपि गृहीत्वा अत्रानीयताम्। यथा तां विडम्बनेन फलं दर्शयामि"। इति लोकमुखाच्छ्रुत्वा कनकवती मां प्रति प्राह—'अहं लक्ष्मीपुञ्जहारं गृहीत्वा मगधाया गृहे यामि, तया सह मम प्रीतिर्वर्तते। त्वं तु क्वाप्यन्यत्र तिष्ठ' इत्युक्त्वा सा तद्गृहं गता। अहं च अत्रागच्छन्ती युवयोर्मिलिताऽस्मि। अथ कोऽपि राजपुरुषः समेष्यति, ततो यामि"।

तस्यां गतायां कुमारेण कुमारी बभाषे—'ज्ञातं सर्वं स्वरूपम्। त्वं कूपे पतिताऽजगरेण गिलिता। अस्मिन्नपि मया विदारिते च मे मिलिता। कूपोऽप्यत्रैव क्वापि घटते। अद्याप्यावयोः पुण्यं जागर्ति'। अथ रात्र्यतिक्रमे जाते सति स कुमारीं प्रति प्राह—'शृणु तावद्, आत्मीयानि बहूनि कार्याणि कर्तव्यानि सन्ति, अत उत्थीयते'। इति वदन् भट्टारिकाभवने कुमार्या सह गतः। तत्र चम्पकमालायाः काष्ठफालीद्वयं दृष्टम्। तच्च दृष्ट्वा किमपि मनसि विचिन्त्य तेन तां प्रत्युक्तम्-'त्वं पुरुषधारिणी मगधागृहं गत्वा कथाचिद् बुद्धया कनकवतीपार्श्वाद् हारं गृहीत्वा द्वितीयदिनप्रदोषसमये अत्रैवागच्छ। अहमपि आगमिष्यामि'। तेन तस्या ॥ २४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुद्रारत्नं स्वहस्ते क्षिप्तम् । सा गता मगधागृहं प्रति । सोऽपि चचाल । नैमित्तिकवेषं कृत्वाऽग्रे गच्छन् नदीतटे काष्ठसमुदायं मिल्यमानं ददर्श । 'किम् ?' इति चिन्तयन्नग्रे गच्छन् गजेन्द्रं चरन्तं तस्य विष्ठां शोधयतः पुरुषांश्च ददर्श । पप्रच्छ च–'को हेतुर्विष्ठाशोधने ?' । तैरुक्तम्–'श्रीवीरधवलस्वामिनः पुत्रेण मलयकेतुना स्वर्णशृङ्खलिका रत्नजटिता समुल्लालिता गजचारमध्ये पतिता । गजेन गिलिता । यदि स्यात्तदा विष्ठामध्ये लभ्यते' । यावद् एवं स तैः सह वार्तां करोति तावता आक्रन्दयुक्तः कोलाहलोऽजनि । कुमारेण पृष्टम्–'किं भो घटते ?' । तैरुक्तम्—'मलयसुन्दरीदुःखेन राजा राज्ञी च चितां प्रविशतः, स कोलाहलः' । तदा कुमारः कामपि मतिं मनसि धृत्वा कन्यायाः मुद्रिकां गजचारमध्ये प्रच्छन्नं चिक्षेप । तस्मिंस्तत्र स्थिते एव गजेन सा गिलिता । ततः कुमारो नदीतटं प्रति दधावे । भुजद्वयमुत्पाट्य गाढं वक्ति स्म– 'भो भो लोका ! वार्यतां वार्यताम्, राजाग्रे कथ्यते मलयसुन्दरी जीवति' तदा कैश्चिल्लोकैर्मन्त्रिणामग्रे कथितम् । तैश्च धावित्वा लग्ना चिता विध्यापिता । राज्ञा पृष्टम्–'को हेतुः ?' । तावता कुमारोऽपि भूपपार्श्वं प्राप्तः 'चिरं जय जय' इति ब्रुवन् । राज्ञोक्तम्–त्वं कः ? किं कथयसि ?' । तेनोक्तम्–'अहं नैमित्तिकः । निमित्तेन जानामि तव सुता जीवति । चेद् न प्रत्ययस्तदाऽभिज्ञानं वच्मि–यदि त्वत्पुरुषाः कन्यायाः मुद्रिकां कुतोऽप्यानीय दर्शयेयुस्तदा मद्वचः सत्यं, नो चेन्न' । इति श्रुत्वा राजा चिन्तायाः चितायाश्च बहिर्निर्गतः । पुनस्तं पप्रच्छ–'भो नैमित्तिक ! तस्याः स्वयंवरार्थे नृपा आहूताः सन्ति, चतुर्दश्यां स्वयंवरोऽस्ति, तदर्थे किं करिष्यते ?' । तेनोक्तम्-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'नृपान् आकारय, स्वयंवरं कारय, वरस्य वरणवेलायां कुतोऽपि कन्या प्रकटीभविष्यति। महाबलश्च वरो भावी। इति तव कुलदेवीभिर्मम स्वप्ने प्रोक्तमस्ति'। राजा तद्वचसा तुष्टो महोत्सवेन पुरमध्ये स्वगृहं प्राप। तेन नैमित्तिकेन सह वार्तां कुर्वतो भूपस्य प्रभाते गजपालकैर्विज्ञप्तम्-'प्रभो! गजपुरीषमध्याद् मुद्रारत्नमिदं लब्धम्'। राजा मलयसुन्दरीनामाङ्कितं तद् दृष्ट्वा विस्मितो नैमित्तिकमालुलोके। तेनोक्तम्-'देव! तव पुरः सम्यग्ज्ञानं विना कथं कथ्यते?'। तत्प्रत्ययाद् राज्ञा स्वयंवरमण्डपः सज्जितः। सर्वभूभुजां निवासाः कारिताः। नृपा आकारिताः। बुभुक्षितामन्त्रितवत् क्षणं सायं सर्वेऽपि समेताः। नैमित्तिकेनोक्तम्-'देव! मम अर्धसाधितो मन्त्रोऽस्ति। अद्यतनीं निशां विसर्जय, प्रातरागमिष्याम्येव'। राज्ञोक्तम्—'मन्त्रसाधनोपहाराय किञ्चिद् द्रविणं गृहाण'। ततः स किञ्चिद् द्रविणं गृहीत्वा ययौ। निशामतिक्रम्य सूर्येऽनुद्गते स तत्रागत्य नृपं प्राह—'स्वामिन्! त्वदीयकुलदेवीभिः स्वयंवरयोग्यः स्तम्भो दत्तोऽस्ति। स पूर्वदिक्प्रतोल्याः प्रत्यासन्नं घटते। अहं पुनस्तत्रैव गच्छामि'। इत्युक्त्वा स गतो राजपुरुषेण सह। स्तम्भं दृष्ट्वा राजनरेण राज्ञोऽग्रे प्रोक्तम्। ततो राजा महोत्सवपूर्वं स्तम्भसमीपं ययौ। नैमित्तिकेन भव्ययुक्त्या पूजितः। ततः पुरुषैरुत्पाटितः। अग्रे समग्रेण परिकरेण युक्तो राजाऽचालीत्। महोत्सवेन स्वयंवरमध्ये ऊर्ध्वस्थां शिलां कृत्वा तदाधारेण स्तम्भोऽपि भव्ययुक्त्या नैमित्तिकेन स्थापितः। वज्रसारं धनुर्बाणयुक्तं तत्पार्श्वे स्थापितम्। ततो राजानः सिंहासनेषु निविष्टाः। गीत-नृत्याद्युत्सवे भवति सति नैमित्तिकः शीघ्रं बहिर्गत्वा वेषं परावृत्य वीणावादकमध्ये गत्वा निविष्टः। ततः प्रतिहार्या प्रोक्तम्—'अस्य स्तम्भस्य द्विहस्तमानम् अग्रं बाणेन यो भेत्स्यति स कुतोऽपि



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रादुर्भूतां कन्यां परिणेष्यति'। ततः सर्वेऽपि नृपा नृपपुत्राश्च उत्थिताः, परं केनापि धनुरारोपयितुं न शक्तं, केनापि च बाणः क्षिप्त इतस्ततोऽगात् । न केनापि स्तम्भाग्रं भिन्नम् । ततो राजा विषण्णः । नैमित्तिकमपि अदृष्ट्वा परं खेदं प्राप । ततो मन्त्रिवचसा पटहो दत्तः—'यः कोऽपि स्वादेशिको वैदेशिको वा धनुरारोप्य स्तम्भाग्रं भिनत्ति स कन्यां परिणयतु'। ततो वैणिकरूपेण[1] कुमारः[2] स्तम्भसमीपमागत्य वीणां वादयित्वा प्राह—'हे राज्ञः कुलदेवताः ! प्रसन्ना भवन्तु' इत्युक्त्वा धनुरारोप्य बाणं चिक्षेप । तत्क्षणं स्तम्भाग्रे विदारिते सति फालीद्वयमुद्घटितं पपात । मध्ये वरमालाधारिणीं लक्ष्मीपुञ्जहारभूषितां दिव्यदुकूलशालिनीं मलयसुन्दरीं दृष्ट्वा राजा लोकोऽपि च महाश्चर्यपूरितोऽभूत् । तया च वैणिककण्ठे वरमाला न्यस्ता । सर्वेऽपि भूपास्तं दृष्ट्वा कोपाविष्टा युद्धं कर्तुमुत्थिताः । राज्ञा प्रोक्तम्—'किमहो ! युद्धं क्रियते ? । पटहोद्घोषणे कृते यदि वैणिकेन बलं दर्शयित्वा कन्या वृता तदा कः कोपः ?' ततो विशेषतो रोषारुणाः सैन्यानि सज्जयामासुः । राज्ञोक्तम्—'नैमित्तिकवचः सर्वमपि मिलितम् । परं सूरपालनृपसुतो वरो नाऽभूत्, यः पुनर्महाबलो बलवानेव कोऽपि कथितः'। इति श्रुत्वा वैणिको मनसि हसन् वज्रसारमेव धनुर्गृहीत्वा शरान् वर्षयन् नृपाणां सम्मुखोऽभूत् । राजापि तस्य परितः ससैन्यो योद्धुं ढुढौके ततः कुमारेण सर्वे भूभुजो भग्नाः पलायितुं लग्नाः । तदा केनापि भट्टेन कुमारमुपलक्ष्य प्रोक्तम्—'

१. वीणा शिल्पमस्य स वैणिकस्तद्रूपेण-वीणावादकस्वरूपेण । २ महाबलः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"सूरपालसुतः शेषशोभां धत्ते महाबलः। समस्तान् भूभुजो जित्वा सत्यां कुर्वन्निजाभिधाम् ॥१॥

राजा तच्छ्रुत्वा चमत्कृतो मन्त्रिणं बभाषे—'किमेतद् घटते ?'। तेनोक्तम्—'हे प्रभो ! कुलदेवीप्रसादात् पुण्यप्रभावाच्च सत्यम् असम्भाव्यमपि भवति'। ततो ज्ञाततत्स्वरूपेण राज्ञा सर्वेऽपि नृपाः सम्बोध्य युद्धान्निवारिताः। राजकुमारं कुमारीं च गृहीत्वा महोत्सवेन पुरं प्रविवेश। ततस्तयोः पाणिग्रहणमभूत्। अथ कुमारस्तया सह वासं भेजे। सोऽयं राजा कुमारपार्श्वं समेत्य तत्स्वरूपं पप्रच्छ—'कथम् एकाकी त्वं समेतः ?'। कुमारेणोक्तम्—'देव ! त्वत्कुलदेवीभिरुत्पाट्य अहमानीतोऽस्मि। परं मम माता-पितरौ महादुःखं प्राप्तौ भविष्यतः। यदि प्रतिपद्दिनाद् अर्वाग् न यास्यामि तदा तौ मरिष्यतः, अतो मां विसर्जय'। राज्ञोक्तम्—'तत्पुरम् इतो द्वाषष्टियोजनानि स्यात्, अतस्तव प्रयाणयोग्यां करभीं सज्जयामि। रुष्टान् राज्ञोऽपि संमान्य स्वस्वस्थानं प्रेषयामि'। इत्युक्त्वा राजा निर्गतः। अथ कुमारः प्रियापार्श्वे प्रकटं हारस्वरूपं यावत् पृच्छति तावद् एका महल्लिका तत्र प्राप्ता। कुमारः प्रश्नं कुर्वन् स्थितः। मलयसुन्दर्योक्तम्—'एषा वेगवती मे धात्री रहस्यस्थानम्'। ततः सा निविश्य तौ प्रति प्राह—'किमिदम् आश्चर्यम् ?, सत्यं कथ्यताम्'। पूर्वं कुमारेण स्वस्वरूपं कथितं, यावद् द्वौ मिलितौ। ततः कुमारी पुंरूपा मगधागृहं प्रति चलिता। कुमारस्तु नैमित्तिकवेषेण निमित्तं कथयित्वा राजानं चितां प्रविशन्तं निवार्य, गृहं नीत्वा, तद्दत्तद्रविणेन रात्रौ [1]तक्ष्ण उपकरणानि



१. वर्धकेः-त्वष्टुः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[1]वर्णकादिकं च गृहीत्वा, बहिर्गत्वा भट्टारिकागृहे तत्कालीद्वयं तक्षित्वा रम्यमकार्षीत् । तावत् तत्र केऽपि तस्करा मञ्जूषामेकां तत्र मुक्त्वा रक्षपालं च मुक्त्वा पुनः पुरमध्यं गताः । रक्षपाल एव मञ्जूषातालकम् उद्घाटयितुं प्रवृत्तः, परं नोद्घटते । तदा कुमारेण चौरसंज्ञा कृता । तेन आहूतः सोऽपि तस्य मिलितः, तालकमुद्घाटितं च । रक्षपालेन सारं वस्तु निष्काश्य पोट्टलके बद्ध्वा प्रोक्तम्—'हे मित्र ! यद्यहं पोट्टलकं गृहीत्वा यास्यामि, यदि च ते तस्करा मम पृष्ठं करिष्यन्ति तदा मां हत्वा सर्वं ग्रहीष्यन्ति । किमपि दर्शय स्थानं यत्र कियतीं वेलां सुखेन तिष्ठामि । तेषु चौरेषु च गतेषु अहमपि यास्यामि' । इत्युक्ते कुमारेण देवकुलस्य पद्मशिलामुत्पाट्य पोट्टलकयुक्तश्चौरो मध्ये क्षिप्तः । शिला तथैव कृता । कुमारः प्रत्यासन्नवटकोटरे प्रविष्टः । तत्र देवताहृतं स्वीयं वस्त्राभरणादिकं दृष्टम् । तेन आश्चर्यं बिभ्रता सर्वं संगृहीतम् । तत्र च मलयसुन्दरीं समागच्छन्तीं दृष्ट्वा स वटकोटराद् निर्गत्य तस्या मिलितः । तया चोक्तम्–'कनकवती त्वां पतिमिच्छन्ती समेति' । कुमारेणोक्तम्—'तन्मुखमपि द्रष्टुं न युक्तं, परं स्वस्वरूपं कथय' । इत्युक्ते कुमारी प्राह—"मया तवादेशेन पुरमध्ये मगधागृहं पृच्छन्त्या क्वापि देवकुले स्थिता मगधा दृष्टा । केनाप्युक्तम्–'सेयं मगधा, परं केनापि धूर्तेन सङ्कटे पातिताऽस्ति' । मया समीपे गत्वा प्रोक्तम्—भद्रे ! किं ते सङ्कटम् ?' । तयोक्तम्—"शृणु, निजगृहाङ्गणस्थया एष पुमान् मया हास्येन प्रोक्तः—'ममाङ्गं दुःखयति, क्षणं संवाहय,

---

१. हिङ्गुल-चन्दनादिकम् ।





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहं किञ्चन ते दास्यामि ' स क्षणं संवाह्य गन्तुं प्रवृत्तो मां बभाषे—' मम किञ्चन देहि ' । अहं वस्त्रं द्रम्मशतादिकं च दातुं प्रवृत्ता, परम् एष ' किञ्चन ' याचते । किञ्चनशब्देन किं दीयते ?, अतोऽनेन अत्र देवकुले रुद्ध्वा स्थापिताऽस्मि ' । इति वेश्योक्तं श्रुत्वा मया स धूर्तोऽपि प्रोक्तः—' भो ! मध्याह्ने तु भवतो-र्विवादो भङ्क्ष्यते ' इत्युक्त्वा द्वावपि मया प्रेषितौ । मया ततः सर्पग्राहिणां पार्श्वात् सर्पं गृहीत्वा घटान्तः क्षिप्त्वा स घटस्तत्रैव देवकुलमध्ये मुक्तः । वेश्या धूर्तो लोकाश्च कौतुकेनायाताः । मयोक्तम्—' भो ! घटमध्ये तव दातव्यं वर्तते, त्वं गृहाण ' । तेन घटमध्ये हस्तः क्षिप्तः, सर्पेण च झाटूकारितः । प्राह च—' भो ! मध्ये किञ्चन विद्यते ' । वेश्यया मया चोक्तम्—' तर्हि त्वया ग्राह्यम् ! ' । इत्युक्त्वा हसित्वाऽहं मगधया सह चलिता । लोका अपि हसन्तो गताः । स च वराकः सर्पदष्टस्तोतलागृहं प्रति चलितः । अहं तया सह चलिता तद्गृहद्वारं प्राप्ता तां प्रत्यूचे—' हे मगधे ! तव गृहे किमपि राजविरुद्धं मानुषं वर्तते ?' । इति श्रुत्वा मगधा मत्पादयोर्लग्ना—' हे सत्पुरुष ! त्वं ज्ञानी वर्तसे । मद्गृहे कनकवती राजपत्नी राजद्विषा पूर्व-परिचयेन प्राप्ताऽस्ति । सा ज्वलन्ती गड्डरिकेव मया दाक्षिण्येन स्थापिताऽस्ति । तां कथञ्चित् त्वमेव निष्का-शय, त्वया न कस्याग्रे वाच्यम् ' । मयोक्तम्—' न वक्ष्ये, सा मम मेलनीया ' । ततोऽहं तया मध्ये नीत्वा स्नान-भोजनादिकं कारिता । रात्रौ कनकवती तया मम समीपमानीता । सा मां दृष्ट्वा हास्यादिकं कुर्वती स्वकीयभावं प्रकाशयामास । पप्रच्छ च—' कस्त्वम् ?' । मयोक्तम्—' क्षत्रियोऽहम् । मम मित्रं रूपनिर्जितमदनं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बहिर्वर्तते । त्वं का ?' । ततः सा सर्वं स्वस्वरूपं प्राह । मयोक्तम्—'यदि पतिमिच्छसि तदा तद् मन्मित्रं कुरु । यत् तवाभरणादिकं तद् दर्शय'। तया सर्वं दर्शयित्वोक्तम्—'लक्ष्मीपुञ्जहारश्चतुष्पथस्थितकीर्तिस्तम्भासन्ने न्यस्तोऽस्ति । साम्प्रतं मध्यरात्रिर्जाता, प्रातस्तु दिनेऽहं प्रकटं तत्र गन्तुं न शक्नोमि, सन्ध्यासमये प्रदोषे एव त्वया सह मित्रपार्श्वे नेष्यामि'। इत्युक्त्वा स्थिता । अहमपि सुखेन सुष्वाप । प्रभाते मया कीर्तिस्तम्भस्थाने हारो विलोकितः, परं न लब्धः । सायं मयोक्तम्—'आगच्छ, गम्यते' । ततः सा वेश्यागृहान्निर्गत्य तं हारं गृहीत्वा आगच्छति, अहमग्रे भूत्वा समेताऽस्मि"। कुमारेणोक्तम्-'अहं देवकुले पाश्चात्यभागे तिष्ठन्नस्मि । अत्र साम्प्रतं तस्कराः समेता आसन्, सावधानतया भाव्यम्'। इत्युक्त्वा महाबलोऽदृष्टो भूतः। तावता कनकवती तत्रायाता बभाषे-'क्व ते मित्रम् ?' तयोक्तम्-'मैवं वद, निभृता तिष्ठ, अत्र केऽपि प्रत्यासन्ने तस्कराः सन्ति'। सा भीताऽभाणीत्-'रक्ष्यतां मम हारादिकं, ते ग्रहीष्यन्ति'। कुमार्योक्तम्-'मा भैषीः, एका मञ्जूषाऽत्र वर्तते, मम हस्ते सारदुकूल—हारादिकं समर्प्य त्वं मध्ये प्रविश यावत् तस्करा यान्ति'। तया तथैव कृतम् । सा मञ्जूषामध्ये प्रविष्टा । कुमार्या तालकं दत्त्वा कुमार आहूतः । ताभ्यां द्वाभ्यामुत्पाट्य मञ्जूषा गोलानदीजले प्रवाहिता । वैरं वालितम् । ततः कुमारेण कुमारी ललाटे निष्ठ्यूतेन स्पृष्ट्वा श्रीरूपा चक्रे । चन्दनेन अर्चित्वा हार-दुकूलभूषितां च कृत्वा सज्जीकृतफालीमध्ये स्थापिता । 'यदाऽहं वीणां वादयित्वा बाणं मुञ्चामि तदा त्वया एता नष्टाः कीलिकाश्चालनीयाः, फालीद्वयं विघटिष्यते' इत्युक्त्वा द्वितीया फाली



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदुपरि स्थापिता । ततः कुमारेण स स्तम्भश्चित्रितस्तथा यथा सन्धिरपि न ज्ञायते । तस्य तत्र तिष्ठतस्ते तस्कराः पुरमध्यात् प्राप्ताः । स्वां मञ्जूषां रक्षपालं च अदृष्ट्वा तत्स्वरूपं कुमारस्याग्रे प्रोच्य पुनः पप्रच्छुः—'स क्व ?' । तेनोक्तम्—'पूर्वं मदीयमेकं कार्यं कुरुत, पश्चात् कथयामि' । तैरुक्तम्—'किं ते कार्यम् ?' । तेनोक्तम्—'स्तम्भमेतमुत्पाट्य प्रतोलीप्रवेशं नयत' । तैस्तथा कृते सोऽवादीत्—'अहं प्रच्छन्नस्थितो यादृशं दृष्टवान् तादृशं कथयन्नस्मि—तेन रक्षपालेन तालकं भङ्क्त्वा मञ्जूषा उद्घाटिता, सारं वस्तु च दृष्ट्वा मञ्जूषां नदीजले क्षिप्त्वा मध्ये प्रविश्य तां तारयामास । एवं कुर्वन् दृष्टः, ततोऽहं न वेद्मि' । इति श्रुत्वा ते तस्करा नदीतटं प्रति धाविताः । कुमारेण च स्तम्भरक्षां कुर्वता रात्रिरतिक्रान्ता । प्रातः स्तम्भः पुरमध्ये मण्डपे स्थापितः । अग्रेतनं सर्वं स्वरूपम् एवं कुमारस्य कुमार्याश्च पूर्वस्वरूपं प्रोक्तम् ।

अथ कुमारेण प्रोक्तम्—'हा हा ! देवकुलशिखरस्थितश्चौरो मरिष्यति, अहं गत्वा तं निष्काशयामि' । कुमार्योक्तम्—प्राणेश ! अहमपि सहैव आगमिष्यामि' । ततो वेगवत्या अग्रे प्रोच्य तौ द्वावपि चलितौ । राजा नरेश्वरान् बहु मानयामास, परं ते प्रोचुः—'वयं प्रातस्तं महाबलं हत्वा त्वत्सुतां गृहीत्वैव यास्यामः, नान्यथा' । राजा तन्निश्चयं ज्ञात्वा त्वरितं करभीं सज्जीकृत्य कुमारचालनाय कृतनिर्णयस्तत्रागात् । तौ अदृष्ट्वा राज्ञा पृष्टे वेगवत्योक्तम्—'कुमार्योक्तं यद् मया देव्या उपयाचितकं कृतमस्ति, ततस्तौ बहिर्गतौ' । तच्छ्रुत्वा राजा क्षणं प्रतीक्ष्य बभाषे—'अद्यापि तौ नायातौ, किं कारणम् ?' । तौ सर्वत्र पुरमध्ये विलोकितौ, परं न लब्धौ ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रभाते स्वयंवरायाता नृपा अपि तत्स्वरूपं ज्ञात्वा विलक्षाः स्वस्वपुरं प्रति चलिताः। राजा राज्ञी च चिन्ताम्भोधिमग्नौ वेगवत्या भाषितौ–'किं दुःखेन धृतेन ? । तौ केनापि अपहृतौ घटेते, अतो गिरि–वनादिषु शोध्येते । पृथ्वीस्थानपुरे च सूरपालभूपस्यापि ज्ञाप्यते, यतः सोऽपि विलोकते'। राजा तच्छ्रुत्वा 'साधु साधु' इति वदन् तद्बुद्धिं प्रशंसयन् मलयकेतुकुमारं पृथ्वीस्थानपुरं प्रति प्रेषयामास ।

इति श्रीअञ्चलगच्छे श्रीमाणिक्यसुन्दरसूरिविरचितायां मलयसुन्दरीकथायां पाणिग्रहणवर्णनो नाम द्वितीय उल्लासः ॥







For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# अथ तृतीयो उल्लासः ॥

अथ कुमारः कान्तया सह तदा बहिर्निर्गतः । प्रियां प्राह–'रात्रौ बहिः स्त्रीणां भ्रमणं न युक्तम्' । इत्युक्त्वा आम्ररसेन गुटिकां घृष्ट्वा तस्या भाले तिलकं कृतम् । सा पुंरूपा तेन कृता । ततस्तौ देवकुलं गत्वा तं चौरं शिखरान्निष्काशयामासतुः । कुमारेणोक्तम्–'भोः ! त्वदीयाः सहायका मयोत्तरं कृत्वा अन्यत्र प्रेरिताः सन्ति, त्वं यथेच्छं व्रज' । सोऽपि हृष्टो गतः । अथ तौ पुरो गच्छन्तौ वटोपरि वार्तालापं शुश्रुवतुः । कुमारेणोक्तम् –'प्रिये ! निःसञ्चलतया भाव्यम् । केऽपि वटोपरि वार्तां कुर्वन्ति' । तदा लक्ष्मीपुञ्जहारः स्वकीयकट्यां स्थापितः । तौ वटकोटरे प्रविश्य निश्चलौ स्थितौ । तदा वटोपरिस्थ एको भूतोऽपरान् प्राह–"भोः ! प्रात-र्महत्कौतुकं वर्तते, श्रृणुत–पृथ्वीस्थानपुरे सूरपालो नाम राजा, पद्मावती राज्ञी, महाबलः पुत्रः । तेन लक्ष्मीपुञ्ज-हारस्य पञ्चदिनान्तर्वालनकृते प्रतिज्ञा कृताऽऽसीत् । मात्रापि च प्रोक्तमासीत्–'यदि पञ्चदिनान्तर्हारं न लप्स्ये तदा मरिष्यामि' । परं कुमारस्य शुद्धिरपि नास्ति । कल्ये पञ्चमं दिनम् । सा राज्ञी जला–ऽग्नि–विषादिना केनापि प्रकारेण मरिष्यति, तस्याः पृष्ठे राजापि मरिष्यति, तदनु जना अपि मरिष्यन्ति" । तच्छ्रुत्वा ॥ ३४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुमारोऽचिन्तयत्—'हा ! किं भावि ?, मयि जीवति सर्वं कुलं विसंस्थुलं भावि !'। तस्मिन्नेवं चिन्तयति भूतेनोक्तम्–'भोश्चलत सर्वेऽपि, तत्र गम्यते'। केनापि भूतेनोक्तम्–'किमपि यानं वीक्ष्यते'। केनापि कथितम्–'वट एव यानम्'। ततः सर्वैरपि हुङ्कारो मुक्तः, वट उत्पतितः। तत्कोटरस्थौ तावपि चलितौ। क्षणेन स वटः पृथ्वीस्थानपुरेऽलम्बशैलाभिधानगिरिसमीपे स्थितः। कुमारस्तां भूमिमुपलक्ष्य प्रियां प्रति प्राह—'प्रिये ! जाग्रति पुण्यानि, सेयं मम जन्मभूमिः, वटकोटरं त्यज्यते, वटोऽन्यत्र मा व्रजतु'। ततस्तौ कोटरान्निर्गत्य कदलीगृहं गतौ। तत्र स्थिताभ्यां ताभ्यां पुनरपि वट उत्पतन् दृष्टः। कुमारेणोक्तम्–'वटः पुनः स्वस्थानं याति, भव्यं कृतमावां कोटरान्निर्गतौ'।

अथ कुमारेण स्त्रीरुदितं श्रुत्वा प्रिया प्रोचे–''कापि स्त्री रोदिति, दुःखं स्फेटयामि'। तस्यां वारयन्त्यामपि स्वीयोत्तरीय–कुण्डलादिकं दत्त्वा हारे कटीस्थे एव सोऽचलत्। सा मलयसुन्दरी पुंरूपा रम्भागृहेऽस्थात्। तया तन्मार्गं पश्यन्त्या एव चिन्तया रात्रिरतिक्रान्ता, परं कुमारो नागात्। अथ तया चिन्तितम्–'पित्रोर्मिलनायोत्कण्ठितः स मध्ये गतो भविष्यति, ततोऽहमपि पुरमध्यं यामि'। इति विचिन्त्य चलिता प्रतोलीद्वारं प्राप्ता। रक्षपालेनोक्ता–'भोः कस्त्वं नव्यो वीक्ष्यः ?'। परं किमप्यस्यामब्रुवाणायां रक्षपालेनेतरैश्च सम्यगालोक्य प्रोचे–'भो ! महाबलनामाङ्किते अस्य कर्णयोः कुण्डले, तस्यैव च वस्त्राणि, कोऽपि चौरोऽयं तन्मित्रं वा'। ततस्तां भूपपार्श्वं नीत्वा स्वरूपं च तैः प्रोक्तम्। ततो राज्ञा सूरपालेनापि पृष्टम्। परं तया चिन्तितम्–'पाश्चात्यमसम्भाव्यं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथितं न कोऽपि प्रत्येष्यति, अतो मौनतया स्थेयम्' । इति विचिन्त्यासौ मौनेन स्थिता । पुनः पुनः पृच्छ्यमानावादीत्–'महाबलो मे मित्रं, तेनाभरणादिकं दत्तम्' । राज्ञोक्तम्-'तर्हि स क्वास्ति ?' । तयोक्तम्–'सोऽत्रैव क्वापि स्वेच्छया चरन्नस्ति' । राज्ञा चिन्तितम्–' यदि पुत्रस्य मित्रं भवेत् तदा कोऽप्येनं नोपलक्षयेत् ? । कुमारोऽप्यत्रैव पुरे स्थित इत्ययं वदति, परं स तु क्वापि नोपलभ्यते !, ततोऽयं न घटते तन्मित्र', परन्तु येन कुमारस्य वस्त्र–कुण्डलादिकं हृतमासीत् स एवायं चौरः । अथवा यो लोभसाराभिधश्चौरो वटवृक्षे उद्बद्धस्तस्यैव भ्राता सम्बन्धी वा । नूनमेतैरेव मम पुत्रोऽपि हतो घटते' । इति विचिन्त्य तलारक्षेण प्रकटा चिन्तितवार्ता कथापिता । सर्वैरपि कथितम्–'सत्यमेव, अल्पवक्तारश्चौराः स्युः । राज्ञोक्तम्–'सोऽयं मे वैरी बहिर्नीत्वा हन्यताम्' । इति श्रुत्वा मलयसुन्दर्या चिन्तितम्—'विषमं सङ्कटं पतितं किं करिष्यति !' । सा तदा तमेव श्लोकं स्मर्तुं लग्ना, तावताऽमात्येनोक्तम्–'प्रभो ! रूपवान् सरलः कोऽपि नरोऽयं दृश्यते; ततः सम्यग् न ज्ञातः कथं हन्यते ?, ततोऽयं दिव्यं कार्यते, यदि न शुध्यति तदा हन्यते, इत्थं कृते जनापवादोऽपि न स्यात्' । राज्ञोक्तम्–'भव्यम्, तर्हि कार्यते किं दिव्यम् ?' । सर्वैरपि प्रोक्तम्–'घटसर्पदिव्यं महत्तरम्' । ततो राज्ञा आभरणादिकं लात्वा तलारक्षैर्वेष्टिता धनञ्जयक्षस्य गृहं प्रति चालिता । स्वयमपि यावच्चलति तावता चेटी प्राप्ता प्राह–'प्रभो ! [1]देवी कथयति–न हारो न कुमारोऽपि प्राप्तः । पञ्चमं दिनमद्य जातं, ततोऽलम्बाद्रौ गत्वा [2]भृगुपातं करिष्यामि' । राज्ञोक्तम्–'देव्या अग्रे

---

१ राज्ञी । २ पर्वतशृङ्गपतनम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वं कथय– कोऽपि पुत्रस्य मित्रं शत्रुर्वा समेतोऽस्ति, पुत्राभरणादिकं चटितमस्ति, स पुमान् दिव्यं कार्यमाणोऽस्ति, भटा अपि पुत्रवीक्षणाय प्रेषिताः सन्ति, ममापि सदृशमेव दुःखमस्ति, ततस्तत्स्वरूपवीक्षणं यावत् प्रतीक्षस्व'। राज्ञेत्युक्त्वा कुमाराभरणादिकं दत्त्वा चेटी प्रेषिता। सा च देवीं प्रति तत्सर्वं कथयामास। देवी तच्छ्रुत्वा आभरणादिकं च दृष्ट्वा हर्ष–शोकाकुला तत्पुरुषवीक्षणाय सपरिवारा यक्षगृहं प्राप्ता। राजाऽपि प्राप्तः, लोकाश्च मिलिताः। राज्ञा गारुडिकाः सर्पग्रहणाय प्रेषिता अलम्बाद्रिमध्याद् महासर्पमानिन्युः। स च घटे क्षिप्तः। मलयसुन्दर्या[1] पुंरूपया स्नानं कृत्वा परमेष्ठिस्मरणं कृत्वा सर्पो निष्काशितः। सर्पो रज्जुसदृशो हृदयाग्रे हस्ते धृतः। तेन सर्पेण स्वमुखाद् लक्ष्मीपुञ्जहारो निष्काश्य तत्कण्ठे क्षिप्तः, जिह्वया च तस्या ललाटं स्पृष्ट्वा सा स्त्रीरूपा कृता। सर्वेऽपि चमत्कृताः। सर्पस्तस्याः शिरसि फणां कृत्वा स्थितः। राज्ञोक्तम्– नूनं कोऽपि देवोऽयं दानवो वाऽन्यो वा सिद्धः सर्परूपेण खेलति, स्वस्थाने मुच्यताम्'। अथ क्षमयित्वा दुग्धं पाययित्वा स पर्वते मोचितः। ततो नृपेण सा स्त्री भाषिता–'त्वं का?, कुतोऽयं ते हारः?'। तयोक्तम्–'अहं चन्द्रावतीशवीरधवलस्य सुताऽस्मि, सर्परूपं तु सम्यग् न वेद्मि' ततो राजा देवीं भणति–' 'एषा कथयति, परं न मन्यते। कथं वीरधवलसुता एकाकिनी समेति?। यदि कदाचित् [2]तस्य कान्ता भविष्यति तदा कोऽपि पृष्ठत आगमिष्यति; अत एनां लात्वाऽन्तःपुरं गच्छ। हारो लब्धोऽस्ति पश्चदिनान्तः, ततो मृत्युकदाग्रहो न कर्तव्यः'। देवी प्राह–'हारेण किं

---

१. मलयसुन्दरी। २. पुत्रस्य।



गद्यबद्ध–श्री मलय–सुन्दरी–कथा ॥ ॥ ३७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करोमि यदि पुत्ररत्नं गतम् ?' । राज्ञोक्तम्–'तथापि प्रातर्यावन्न वक्तव्यम्, तावता पुत्रशुद्धिरपि भविष्यति' । ततो देवी मलयसुन्दरीं सह लात्वा सौधं प्राप्ता । राजापि स्वस्थानमाप । पुत्रवीक्षणपरस्य राज्ञो राज्याश्च महता कष्टेन प्रभातं जातम् । देव्या कथितम्–'पुत्रस्तावन्न लेभे, अथाहं मरिष्ये, मदर्थं सोऽपि गतः !' । ततो राज्ञी राजा बहवो लोकाश्च भृगुपातकरणाय पर्वतं प्रति चलिताः । यावत्तत्र गतास्तावता केनापि पुरुषेण शीघ्रमागत्योक्तम्–'देव ! स चौर उद्बद्धोऽस्ति तस्मिन्नेव वटे महाबलकुमारोऽपि उल्लम्बितोऽस्ति' । राजा राज्ञी च तच्छ्रुत्वा 'वत्स वत्स !' इति कुर्वाणौ लोकेन सह धावितौ । तं तादृशावस्थं राजा स्वपुरुषैश्छोटयामास । जलसेचनेन तस्य चेतना वालिता, नेत्रे उन्मीलिते । अथ कुमारः स्वस्थो निविश्य प्रणमन् तातं प्रति प्राह–'तात ! किमिदम् ?' । तेनोक्तम्–'वत्स ! तव किमिदं स्वरूपम् ?' । सोऽवादीत्–'तात ! श्रूयताम्' । ततः कुमारेण मूलतः सर्वस्वरूपं कथितम् । यदा मलयसुन्दरी कदलीगृहे मुक्ता, रुदितानुसारेण च गतस्तत्कथ्यमानमस्ति–तदा कुमारोऽग्रे गच्छन् स्मशाने योगिनं ददर्श । सोऽपि योगी कुमारं दृष्ट्वा अभ्युत्थानं कृत्वा प्राह–'भो वीरेन्द्र ! मया सर्वापि सामग्री मेलिताऽस्ति, किन्तु त्वं सहायक उत्तरसाधको भव यथा स्वर्णपुरुषः सिध्यति' । कुमारेण प्रपन्ने स प्राह—'यत्र तर्हि नारी रोदिति तत्र वटे चौर उल्लम्बितः सल्लक्षणो वर्तते, तमानय' । ततः कुमारो वटतलं गत्वा तां रुदतीं स्त्रीं प्राह—'हे भद्रे ! का त्वं रोदिषि ?' । साऽवादीत्—'हे सत्पुरुष ! यो वटे बद्धो दृश्यते स चौरो मे भर्ता । अहमपि प्रातरेव अद्य मिलिता, परं महान् स्नेहोऽभूत् । एष च



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अद्यस्तृतीययामे तलारक्षैः क्वापि लब्धः, राज्ञा च घातितः । अहं स्नेहेनागताऽस्मि, जाने अस्य मुखं चन्दनेन विलिम्पामि । परम् एनं प्राप्तुं न शक्नोमि, ततो रोदिमि ' । कुमारेणोक्तम्—' तर्हि मम स्कन्धमारुह्य वाञ्छितं कुरु ' । ततः सा तस्य स्कन्धमारूढा शवमुखं मुखेन स्प्रष्टुं लग्ना, तदा शवेन तस्या नासिका मुखेन गृहीता । तस्याः सीत्कारं कुर्वत्या इतस्ततो मुखं कुर्वत्या नासा त्रुटिता, अग्रभागः शवमुखे स्थितः । अथ कुमारस्य तत्पश्यतो हास्यमागतं, तदा शवेनोक्तम्—' हे ! हास्यं मा कुरु, त्वमप्यत्रैव वटे उल्लम्बयिष्यसि ' । अस्मिन्नवसरे राज्ञोक्तम्—' वत्स ! शवः कथं वक्ति ?' । तेनोक्तम्—' तात ! कोऽपि व्यन्तरो वक्ति ' । ततः [1]स भीतः स्थितः । साऽपि तस्य स्कन्धादुत्तीर्णा पप्रच्छ—' कस्त्वम् ? क्व वससि ?' । कुमारेण स्वस्वरूपे प्रोक्ते सापि प्राह—' नासायां रूढायां सत्याम् अहं ते मिलिष्यामि, चौरहृतं च सर्वं दास्यामि ' । ततः सा गता । कुमारो वटोपरि चटित्वा शवबन्धान् छोटयित्वा, तत्केशान् गृहीत्वा, उत्तीर्य, शवं स्कन्धे कृत्वा योगिनः पार्श्वे मुमोच । ततो योगी शवं स्नपयित्वा, चन्दनद्रवैश्चर्चित्वा, अग्निकुण्डसमीपे मण्डलं स्थापयित्वा मंत्रं सस्मार । शव उल्ललति, परं वह्निकुण्डे न पतति । एवं रात्रेरतिक्रमे शवोऽट्टाट्टहासं मुञ्चंस्तत्रैव वटे गतः । योगिनोक्तम्— " किमपि मे स्खलनमागतं, ततः कार्यं न सिद्धम् । पुनरागामिन्यां रात्रौ साधयिष्यते । परं यदि दिने कोऽपि त्वां मम पार्श्वे द्रक्ष्यति तदा स चिन्तयिष्यति—' योगी राजकुमारं विप्रतार्य याति ' ।

---

१. कुमारः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजापि ज्ञास्यति तदाऽनर्थो भविता । अतो यदि त्वं कथयसि तदा ते रूपपरावर्तं करोमि" कुमारेण हारं मुखे क्षिप्त्वा कथिते सति योगिना किमप्यौषधं घृष्ट्वा भाले तिलकं कृतम् । कुमारः सर्पो जातः, अलम्बाद्रिगुहायां योगिना मुक्तः, स्वयं च स्वकार्ये प्रवृत्तः । ततः सर्पः सर्पधरैर्गृहीत्वा घटे क्षिप्त्वा यक्षालयं नीतः । दिव्ये क्रियमाणे निजप्रियामुपलक्ष्य हारो मुखान्निष्काश्य तत्कण्ठे क्षिप्तः, भालं च स्पृष्ट्वा स्त्रीरूपा कृता, गारुडिकैः सर्पश्च स्थाने मुक्तः । रात्रिमुखेऽर्कक्षीरेण ललाटं घृष्ट्वा कुमारो योगिना पुरुषरूपः कृतः । ततस्तौ श्मशानं गतौ । कुमारेण मृतकमानीतं, योगिना स्नपितं, चर्चितं, मण्डले च स्थापितम् । अग्निकुण्डं ज्वालयित्वा मन्त्रं स्मर्तुं लग्नः । शवः पुनरुल्ललति, पतति च । एवमर्धरात्रिर्जाता तावता आकाशे डमरुशब्दा जाताः । तदा कापि देवता समेता प्राह—'रे ! कुशुद्धं मृतकं, स्वर्णपुरुषो न सिध्यति' । इत्युक्त्वा तया कुपितया योगी वह्निकुण्डे क्षिप्तः । शवो वटमेव गतः । 'एनं सुरूपं को हन्ति ?' इति वदन्त्या देवतया नागपाशेन हस्तौ बद्ध्वा कुमारो वटे उल्लम्बितः । कुमारेण सर्पपुच्छं दन्तैश्चर्वितम् । सर्पो बन्धाद् उच्चलितो गतः, परं बाहुस्थितौषधप्रभावाद् विषं न चटितम् । अग्रे च तत्स्वरूपं ज्ञातमेव । एवंविधं स्वरूपं कुमारेणोक्तं श्रुत्वा राजा लोकाश्च प्राहुः—अहो ! शृण्वतामपि भयं जायते, कुमारेण कथमनुभूतम् ?' । एके प्राहुः—'मृतकं किमशुद्धं कथितम् ?' । राज्ञोक्तम्—'यत् स्त्रीनासाग्रं तन्मुखे स्थितं सैव अशुद्धता घटते'। पुरुषैर्मृतकं वीक्षितं, ॥ ४० ॥

१. कुमारः ॥.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथैव दृष्टम् । ततः कुमारेण मन्त्रसाधनस्थानं दर्शितम्, तत्र वह्निकुण्डे योगी स्वर्णपुरुषो दृष्टः, राज्ञा गृहीतः ।

अथ राजा मलयसुन्दरीसहितं स्वपुत्रं सह गृहीत्वा महोत्सवेन स्वसौधं प्राप्तः । दश दिनानि महोत्सवा जाताः । मलयकेतुरपि भगिनीं भगिनीपतिं च शोधयन् तत्र समेत्य भूपं नत्वा निविष्टः । पृष्टः सन् आगमनकारणं प्राह । राज्ञा स्वरूपे प्रोक्ते प्रमुदितो भगिन्या महाबलस्य च मिलितः । परस्परं वार्तालापो जातः । कियन्ति दिनानि सगौरवं स्थित्वा कथञ्चित् सर्वान् अनुज्ञाप्य मलयकेतुश्चलितश्चन्द्रावतीं पुरीं प्राप । तत्र स्वरूपे प्रोक्ते सर्वः कोऽपि प्रमुदितः । पृथ्वीस्थानपुरे महाबलस्य मलयसुन्दर्या सह क्रीडतः सतः सुखेन कालोऽतिचक्राम ।

अन्यदा महाबलो मलयसुन्दरी च गवाक्षनिविष्टौ स्वगृहद्वारागतां तां छिन्ननासिकां ददृशतुः । तां दृष्ट्वा सम्यगुपलक्ष्य च प्रिया प्रियं प्रति प्राह—'प्राणेश ! एषा ममापरमाता कनकवती'। कुमारेणोक्तम्—'यस्या रुदितं श्रुत्वा त्वां कदलीगृहे मुक्त्वा चलितोऽहं सैवेयम्, ततोऽहं स्वरूपं पृच्छामि'। प्रिययोक्तम्—'अहं तवादेशाद् जवनिकान्तरिता शृणोमि'। ततः कुमारेण तस्याम् [1]अपटयन्तरे स्थापितायां प्रतीहारनिवेदिता सा छिन्ननासा समेता, आशिषं च दत्त्वा निविष्टा । स प्राह—'कथ्यतां स्वस्वरूपम्'। साऽवक्—'श्रूयतां, चन्द्रावतीशवीरधवलस्याहं भार्या कनकवती । केनाप्येवमेव नृपमनसि कोपोऽभूत्, अहं नष्टा, मगधावेश्यागृहं प्रविष्टा । तत्र केनापि धूर्तेन भट्टारिकागृहं सङ्केतस्थानमानीता । तत्र तेनोक्तम्—'अत्र चौराः सन्ति' इति ।

१. जवनीकान्तः ।





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततोऽहं भयभीता मञ्जूषायां क्षिप्ता, मम पार्श्वाल्लक्ष्मीपुञ्जहारं दुकूलानि चाऽग्रहीत् । तालकं दत्त्वा तेनान्यः कोऽपि धूर्त आहूतः, ततस्ताभ्यां मञ्जूषोत्पाट्य नद्यां प्रवाहिता । सा प्रातरत्र ते पुरे प्राप्ता, लोभसारेण चौरेण सा दृष्टा निष्काशिता च । तालकमुद्घाटितं तेन, अहं दृष्टा, अलम्बाद्रिगुहायां गुप्तगृहे च नीता । तत्र तेन स्तोकवेलया महान् स्नेहो दर्शितः । ततः स चौरस्तृतीययामे पुरमध्यं प्राप्तः, तलारक्षैरुपलक्ष्य गृहीतः, सायं निपातितः । वटे चोल्लम्बितो मया शैलशृङ्गस्थया दृष्टः । स्नेहप्रेरिता चाहं तत्रागता पश्यन्ती रोदितुं प्रवृत्ता । अग्रे वार्तां त्वं जानासि । अथागम्यतां यथा चौरस्थानं दर्शयामि" । ततः कुमारस्तां सह गृहीत्वा पितुः पार्श्वं गतः । सा वार्ता ज्ञापिता । राज्ञा तत्कथिते स्थाने गत्वा यस्य यद्वस्तु तस्य तदर्पितं, शेषं स्वकोशे क्षिप्तम् । तस्या निवासाय राजकुलासन्नं गृहं दापितम् । सा कुमारावासं पुनरागता । तत्र मलयसुन्दरीं हारभूषितां दृष्ट्वा 'कुतोऽसौ वैरिणी प्राप्ता ?, कूपे पतिता कथं जीविता ?, कथमनेन परिणीता ?, कथमस्या हारश्चटितः ?, याभ्यां चाऽहं प्रवाहिता तावपि एतावेव किम् ?' । इति चिन्तयन्ती मलयसुन्दर्या भाषिता—'मातः ! अनभ्रा वृष्टिः !, कुतस्ते समागमः ?, कथं युष्मन्नासाया इयमीदृशी दुष्टावस्था ?' । ॥ ४२ ॥
कुमारेणोक्तम्—'अलं प्रश्नेन, सर्वं कथयिष्याम्यहम्' । ततः सा तेन शून्यगृहे स्थापिता । 'अहमीदृशी !, वैरिणी च सुखं भुङ्क्ते, भविष्यति च कापि वेला' इति चिन्तयन्ती मलयसुन्दरीसमीपे नित्यं याति । एका ऋजुर्द्वितीया वक्रा, तया सा विश्वासवती कृता ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ तस्या मलयसुन्दर्या गर्भसम्भवोऽभूत् । कुमारेण दोहदेषु पूर्यमाणेषु दिनेषु गच्छत्सु राज्ञा कुमार आदिष्टः–'हे वत्स ! क्रूरनामा भिल्लः स्वदेशं क्लेशयति । त्वं सैन्येन गत्वा तं जित्वा समागच्छ'। स राजादेशं मान्यं कृत्वा आगत्य प्रियां प्रति प्राह । साऽवादीत्–'नाथ ! अहमपि सहागमिष्यामि'। तेनोक्तम्—'साम्प्रतं ते स्थानचालको न युक्तः, अतोऽत्रैव तिष्ठ । त्वत्स्नेहप्रेरितः शीघ्रमागमिष्यामि'। इति कथञ्चिदनुज्ञाप्य भालतिलकगुटिकां तस्यै दत्त्वा ससैन्यश्चलितः । सा दिशां पश्यन्ती गृहे स्थिता । कनकवती समेत्य तां वार्ताविनोदैर्दिनं गमयामास । तयोक्तम्—'मातः ! त्वं रात्रावपि अत्रैव तिष्ठ, येन रात्रिरपि वार्ताभिः सुखेन मेऽतिक्रामति'। तस्या वाञ्छितमेव जातम् । सा प्रपद्य रात्रौ तत्पार्श्वे सुष्वाप । अन्येद्युः प्राह—"हे वत्से ! रात्रौ कापि राक्षसी समेति, यदि त्वं कथयेस्तदाऽहमपि तादृग् भूत्वा तां तर्जयामि यथा पुनर्नायाति । इत्यपि किं न श्रूयते—'[1]रक्खसाण वि भेसजं ?"'। ततस्तया मुग्धया प्रोक्तम्—'मातः ! यथा रम्यं तथा कुर्याः'। तत्रावसरे पुरमध्ये मार्युपद्रवं ज्ञात्वा सा दुष्टा प्रतीहारनिवेदिता राज्ञः पार्श्वं प्राप्ता–प्राह—'प्रभो ! यद्यवसरो वर्तते तदा किमपि हितं वच्मि'। राज्ञा विजने पृष्टा—'किं हितम् ?'। तयोक्तम्—'देव ! मलयसुन्दरी युष्मद्वधूर्मारिर्जाता लोकान् हन्ति, न चेत् प्रत्ययस्तदा रात्रौ भवद्भिर्वीक्ष्यम् । यदि सा राक्षसीरूपेण स्वगृहाङ्गणे विवस्त्रा फेत्कारान् मुञ्चन्ती दृश्यते तदा सत्यं, नो चेन्न । तच्छ्रुद्बुध्या सा

१. राक्षसानामपि भेषजम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रभाते निग्राह्या, रात्रौ निगृह्यमाणा कदाचिच्छलति'। राज्ञोक्तम्—'त्वया न कस्यापि कथ्यम्'। तयोक्तम्—'देव ! अहं किम् अज्ञानाऽस्मि ?'। ततः सा विसृष्टा गता। राक्षसीरूपसामग्रीं कृत्वा मलयसुन्दरीपार्श्वे रात्रौ गत्वा क्षणं विश्रम्योवाच—'हे वत्से ! राक्षसी समेताऽस्ति, तस्या निर्नाशाय गच्छामि'। इत्युक्त्वा सा बहिर्गत्वा [1]वर्णकचित्रितं राक्षसीरूपं कृत्वा विवस्त्रा मुखे ज्वलद् [2]उल्मुकं धृत्वा फेत्कारान् मुञ्चन्ती बभ्राम। राजा प्रत्यासन्नवर्तिगृहोपरि स्थितस्तत्स्वरूपं दृष्ट्वा प्रत्ययमापन्नो रोषाद् भटान् बभाषे—'भो भो भटा ! एनां मलयसुन्दरीं राक्षसीं निगृह्णीत, रौद्राटवीं च नीत्वा विनाशयत यथा न कोऽपि वेत्ति'। ततो राज्ञादिष्टा भटा धाविताः। तान् दृष्ट्वा सा दुष्टा नष्टा, गृहमध्यं च प्रविष्टा कम्पमाना मलयसुन्दरीं प्रति प्राह—'हे वत्से ! अहं राजादेशं विना तव पार्श्वे सुप्ता, अतो राजभटा मां हन्तुमायान्ति। किमपि गुप्तस्थानं दर्शय यथा तत्र प्रविशामि'। तया मञ्जूषा दर्शिता। सा तादृग्रूपैव मध्ये प्रविष्टा, तालकं च दापितम्। अथ राजपुरुषा धावन्तो गृहमध्यमागतां मलयसुन्दरीमेव दृष्ट्वाऽचिन्तयन्—'अहो ! अनया रूपं परावर्तितम् !' 'अथ लोकान् कथं हनिष्यसि ?' इति वदन्तस्तां बलादाकृष्य बहिर्नीत्वा रथम् अध्यारोप्य रात्रावेव रौद्राटवीमध्ये मुक्त्वा वलिताः। प्रभाते राज्ञो मिलिताः। 'कार्यं कृतमस्ति' इति प्रोक्तम्। राजा हृष्टः। प्रोक्तं च—'सा छिन्ननासा ऽहितकारिणी वीक्ष्यताम्'। सा वीक्षिताऽपि न लब्धा। राज्ञा वधूगृहे तालकानि दापितानि। ॥ ४४ ॥

१. हिङ्गुल घृष्टचन्दनादिविलेपनद्रव्यं वर्णकम्। २. अङ्गारम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ कियत्सु दिनेषु महाबलो भिल्लं जित्वा प्राप्तः। पितरं नत्वा स्वगृहं प्रति गच्छन् पित्रा बाहौ धृत्वा मलयसुन्दरीस्वरूपं बभाषे। तच्छ्रुत्वा वज्राहत इवाऽत्यन्तदुःखी असम्भाव्यं तच्चिन्तयंस्तं प्राह—'हे तात! धातुविपर्यासः किं तेऽभूत्?। यद्यपि सा तादृशी दृष्टा, तथापि ममागमं यावत् कथं न प्रतीक्षितम्? तात! या स्त्री छिन्ननासा भूरिकूटानां निधिस्तन्मूलमहं पुरापि वेद्मि। सैव दृश्यतां यथाऽहं तां पृच्छामि' राज्ञोक्तम्—'सा तु न लभ्यते' ततः कुमारो निःश्वसन्निजगृहमागात्। पुत्रवत्सलो राजाऽपि तत्पृष्ठतः समेत्य प्राह—'वत्स! त्वद्वधू रात्रौ राक्षसीरूपेण भ्रमन्ती मया दृष्टा, तत ईदृशं दण्डं कुर्वतो न मे कश्चिद्दोषः, यत इष्टाऽपि विनष्टा भुजा च्छिद्यते। तत् कुमार! मा ताम्य, स्वस्थं मनः कृत्वा स्वं गेहसारं साम्प्रतं पश्य'। इति वदन् सपरिच्छदो राजा पुत्रेण तालकान्युद्घाटयामास। एवं कुर्वता मञ्जूषाया अपि तालकमुद्घाटितम्। तत्र सा पापिष्ठा विवस्त्रा राक्षसीरूपा मुत्कलकेशा कर्तिकाधारिणी बुभुक्षाक्षामा दृष्टा। सर्वेऽपि भीता इव जाताः। कुमारेणोक्तम्—'तात! दुष्टयाऽनया राक्षसीरूपं कृत्वा तव चित्ते प्रत्ययमुत्पाद्य सा निष्काशिता'। ततः सा दुष्टा मञ्जूषातो निष्काश्य गाढं ताडिता सती सर्वं स्वकृतचेष्टितं प्राह। राज्ञा सा खरमारोप्य पुरे भ्रमयित्वा स्वदेशान्निर्गमिता। कुमारः प्रियाविरहाच्चतुर्विधाहारं त्यक्त्वा मर्तुकामो मौनेनाऽस्थात्। राजा राज्ञी चाऽपि तेन मर्तुकामौ





For Private And Personal Use Only

जातौ, तज्ज्ञात्वा पौरा अपि राज्यविनाशचिन्तया व्याकुला जाताः। अस्मिन्नवसरे पुस्तकहस्तः कोऽपि नैमित्तिकः सभां प्राप्तः। राज्ञा सादरं वधूस्वरूपं पृष्टः प्राह–'सा जीवन्त्यस्ति, वर्षप्रान्ते कुमारस्य मीलिष्यति' इति श्रुत्वा सर्वेऽपि समुज्जीविता इव परां प्रीतिं प्रापुः।

इति श्रीअञ्चलगच्छे श्रीमाणिक्यसुन्दरसूरिकृतायां मलयसुन्दरीकथायां मलयसुन्दरीश्वशुरकुलसमागम-राक्षसीकलङ्कपरित्यागवर्णनो नाम तृतीय उल्लासः।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# अथ चतुर्थ उल्लासः ॥

अथ राजा भृत्यानाहूय प्रोचे–'भो ! भवद्भिर्वधूं गृहीत्वाऽटव्यां किं कृतम् ?' तैरुक्तम्–'सा तत्र मुक्ता सती दीना कम्पमाना जाता, ततोऽस्माभिः स्त्रीहत्या न कृता, तत्र जीवन्त्येव मुक्ता'। राज्ञा प्रीत्योक्तम्–'भव्या भो! भवन्तः, भव्यं कृतं भवद्भिः'। इत्युक्त्वा ते सम्मान्य प्रहिताः। कुमारेणोक्तम्–'भृत्या अटव्यां प्रेष्यन्ते, तस्या मातापित्रोश्च ज्ञाप्यते'। राज्ञा तथा कृतम्। ततः सर्वैरपि बलात् कुमारो भोजितः, पश्चात् सर्वैरपि भुक्तम्। ततो भृत्यैरागत्य प्रोक्तम्–'देव ! सर्वत्राटवी शोधिता, परं सा न लब्धा'। कुमारस्तज्ज्ञात्वा तद्विरहातुरो रात्रौ खड्गयुक्तोऽचलत्। राज्ञाऽपि कुत्रचित् तमपश्यता ज्ञातम्–'पुत्रो वधूशोधनाय गतो घटते'।

अथ मलयसुन्दरीस्वरूपं कथ्यते–यदा सा तैर्भटैस्तत्र मुक्ता। ते च गताः। साऽचिन्तयत्–'मया किमपि नापराद्धं, कथमयं श्वशुरः कुपितः ?, कर्मण एव वा विपाकोऽयम्'। इति चिन्तयन्ती, रौद्राटव्यां घूक–शिवाफेत्कारान् शृण्वती, दुःखपूरिता 'हा प्राणनाथ ! हा तात ! हा मातः हा भ्रातः !' इति बिलापान् विलपन्ती, इतस्ततो भ्रमन्ती पुत्रं सुषुवे। सा विशालभालं बालं दृष्ट्वा हर्ष–शोकाकुलाऽवादीत्–'हा वत्स ! त्वज्जन्ममहोत्सवमनो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्था दैवेन हताः, मन्दभाग्याऽहं किं कुर्वे ?'। प्रातः सा नद्यां स्नात्वा वल्लीगृहे बालं लालयन्ती तस्थौ। तदा तत्र कोऽपि सार्थः समेतः सरित्तीरे समुत्तीर्णः। सार्थपः शरीरचिन्तया तत्रागतस्तां दिव्यरूपां वीक्ष्य प्रोचे-'बाले ! का त्वम् ?' सा नाऽवादीत्। पुनः स जगौ-'अहं सागरतिलकनाम्नि नगरे बलसाराभिधो व्यवहारी वसामि। द्रव्यार्जनायान्यत्र गतोऽभूवम्, अधुना स्वस्थानं व्रजन्नस्मि। त्वमेकाकिनी वने किं करोषि ?। सार्थमध्ये समेत्य मत्पार्श्वे सुखं तिष्ठ'। सा तं सरागं विचिन्त्य कूटमुत्तरं चक्रे-'भो महाभाग! अहं चाण्डाली क्षणं रुष्टाऽत्रागताऽस्मि पुनर्विरहातुरयोर्माता-पित्रोर्मिलिष्यामि'। तेनोक्तम्-'मा कूटमुत्तरं कुरु, आगच्छ'। इति वदन् तदुत्सङ्गात् तं बालं बलाद् गृहीत्वा चलितः। सा वत्सस्य धेनुरिव तस्य पृष्ठे लग्ना सार्थेशस्थानं ययौ। सा स्थापिता ससुता। 'पाश्चा-लस्त्रीषु मार्दवम्' इति नीतिवाक्यात् तेन दास्येका प्रोक्ता-'एषा यद्यत् कथयेत् तत्तत् कर्तव्यम्'। अथ निर्विल-म्बप्रयाणकैः स स्वपुरं प्राप। तत्र तां क्वापि गुप्तवेश्मनि स्थापयित्वा एकान्ते प्राह-'यदि हर्षेण मदुक्तं मन्यसे तदा त्वां सर्वस्वामिनीं करोमि'। तयोक्तम्-'बहु न वाच्यं, वरं जिह्वां खण्डयित्वा म्रिये परं ते वाक्यं न मन्ये' तत-स्तेन रुष्टेन तत्पुत्रो गृहीत्वा निजप्रियायै समर्पितः। कथितं च-'मयाऽशोकवनिकायां गतेन लब्धोऽयं बालः पाल-नीयः। अपुत्रयोरावयोरेष पुत्रः'। ततो महोत्सवं कृत्वा 'बल' इति नाम दत्तम। कतिचिद्दिनानन्तरं श्रेष्ठी मल-यसुन्दरीं सह गृहीत्वा प्रवहणेऽचलत्। सा पुत्रदुःखेन रुदती न भुङ्क्ते। तेनोक्तम्-'किं न भुङ्क्षे ?' तयोक्तम्-'मम पुत्रशुद्धिं कथय'। तेनोक्तम्-'मदुक्तं कुरु यथा कथयामि'। सा मौनं कृत्वा स्थिता। श्रेष्ठी बर्बरकूलं गतः। तेन



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र सा बहुद्रव्येण विक्रीता । तत्रापि कलत्रभावैः प्रार्थिता नाऽमंस्त । ततस्तैर्लोकैस्तस्याः शरीरं तक्षित्वा रुधिरं निष्काश्य कृमिरागवस्त्राणि रज्यन्ते । पुनः पोष्यते तक्ष्यते च । एवमन्यदा सर्वाङ्गं तक्षिता रुधिरलिप्ता मूर्च्छिता भूमौ पतिता । तदेकेन भारण्डेन आमिषवाञ्छया उत्पाटिता । स भारण्डः समुद्रोपरि गतोऽन्येन भारण्डेन रुद्धो योद्धुं लग्नः । सा तन्मुखात् समुद्रे गजाकारमत्स्योपरि पतिता सती नमस्कारं पठति स्म । 'धिक् कर्मगतिम् !' इति चिन्तयन्ती तेन मत्स्येन ग्रीवां वालयित्वा विलोकिता । ततः स मत्स्यस्तां भव्ययुक्त्या पृष्ठे वहन् तटाभिमुखं यातः । कस्यापि पुरस्य प्रत्यासन्नतटे पृष्ठादुत्तार्य वलितग्रीवस्तां पश्यन् समुद्रान्तर्गतः । तस्मिन्नवसरे तटपुराधिपतिः क्रीडार्थं तत्रागतस्तन्मत्स्यादिस्वरूपं दृष्ट्वा विस्मितस्तां बभाषे—'हे सुन्दरी ! का त्वं ?, कथं मीनेनात्र सस्नेहतया मुक्ताऽसि ? । इदं सागरतिलकाख्यं वेलाकूलं नगरम्, तस्याऽधिपोऽहं कन्दर्पनामा, तत वं विश्वस्ता सर्वं कथय' । इति श्रुत्वा तया चिन्तितम्— 'जागर्ति ममाऽद्यापि कोऽपि पुण्यलवः, यतो यत्र मे पुत्रस्तत्रैव स्थाने प्राप्ताऽस्ति, कदाचित् सोऽपि मिलेत् । परम् एष राजा मम पितृ-श्वशुरयोर्वैरी वर्तते, यद्यस्य सत्यं वक्ष्यामि तदा मां कदर्थयिष्यति, पुत्रमपि लास्यति' । इति विचिन्त्य निःश्वसत्या तयोक्तम्—'किं पृच्छ्यते ?, अहं पुण्यहीना यत्र तत्र दुःखं सहमानाऽस्मि' । लोकैरुक्तम्—'देव ! दुःखपूरिताऽधुना वक्तुं न शक्नोति, ततः किं पृच्छ्यते ?' राज्ञोक्तम्—तथापि भद्रे ! स्वनाम वद' । तया मन्दमुक्तं 'मलयसुन्दरी' इति । राज्ञा सा स्वपुरुषैर्गृहे प्रेषिता । दासीभिः शुश्रूष्यमाणा सज्जशरीराऽभूत् । ततो राज्ञैकान्ते सा कलत्रभावाय



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भाषिता, परं सर्वथा न मन्यते, राज्ञः सम्मुखं प्रबोधं दत्ते, स च न बुध्यते । अथ राजा तस्याश्चित्तप्रसत्त्यर्थं स्वस्यार्थं यद् यद् रम्यं तत् तत् तस्यै प्रेषयति स्म ।

अन्यदा स्नानस्थितस्य नृपस्याङ्के पक्वम् आम्रफलं पतितम् । तद् दृष्ट्वा नृपोऽचिन्तयत्—'साम्प्रतं फाल्गुनमासि कुतः फलमिदम् ?, ज्ञातं वा, पुरप्रत्यासन्ने छिन्नटङ्कगिरौ सदाफलः सहकारोऽस्ति, तत्फलं शुकेन गृहीतं भारात् पतितं घटते' । राज्ञा रम्यमिति तत्फलं मलयसुन्दर्यै प्रहितम् । भृत्यानां च कथितम्—'फल-मर्पयित्वाऽन्तःपुरे समानीय स्थाप्या' । मलयसुन्दरी तत्फलं दृष्ट्वा 'अहो ! पूर्वपुण्यैः ढौकितमिदम्' इत्यचिन्तयत् तैश्च नरैः सा अन्तःपुरे मुक्ता, राज्ञे ज्ञापितं च । 'नूनं राजा बलादपि मे शीलरत्नं हरिष्यति' इति ध्यात्वा शीर्षाद् गुटिकामाकृष्य आम्ररसेन घृष्ट्वा भाले तिलकं चकार, तदा सा दिव्यरूपः पुरुषो जातः । तं दृष्ट्वा-ऽन्तःपुरं सर्वं विस्मितम्—'देवो विद्याधरो वाऽयम्!' प्राहरिका अपि तं दृष्ट्वा राज्ञोऽग्रे प्रोचुः । राजापि तत्रागतस्तं दृष्ट्वाऽपृच्छत्—'कस्त्वं कीदृक् ? । तेनोक्तम्–स्वयमेव पश्यन्नसि यादृशोऽस्मि' । राज्ञोक्तम्—'भो! या स्त्री मुक्तासीत् सा क्वास्ति ?' रक्षकैरुक्तम्—'देव ! सा बहिर्न क्वाऽपि गताऽस्ति !' राज्ञा चिन्तितम्—सैवेयं पुरुषरूपं कृत्वा स्थिता घटते' । तत उक्तम्—'भो ! ज्ञातमस्य स्वरूपम् । बाह्यावासे स्थापयित्वा बाढं रक्षणीयः' ततः स तत्रानीय धृतः । राज्ञा नित्यं तत्रागत्य स पृच्छ्यते—'भोः! त्वया किं स्त्रीरूपं हित्वा पुंरूपं कृतम्?, कथं च स्त्रीरूपं भविष्यति ?' । परं स किञ्चिद् नोवाच, धर्मध्यानपर एव तिष्ठति । ततो ॥ ५० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजा कोपतस्तं त्रिविधताडनैः कुट्टयति। अथैकदा सोऽचिन्तयत्—'अत्र जीविताद् मरणं वरम्' इति ध्यात्वा रक्षकेषु सुप्तेषु सत्सु ततो निर्ययौ। बहिर्देश्यकुड्यां स्थित्वा प्रत्यासन्नेऽल्पजलाभिधे कूपे पतनाय चलितः। तस्य कण्ठे निविश्य प्राह-'रे देव! यदि त्वया इह जन्मनि तादृशेऽपि कुलेऽवतारं दत्त्वा व्यर्थं जन्म कृतम्, तादृशेन च महाबलेन प्रियेण सह वियोगश्च दत्तः, तथापि आगामिनि भवे प्रसन्नीभूय तेन प्रियेण सह सङ्गमं देयाः'। इत्युक्त्वा यावत् स सज्जो भवति तावद् महाबल एव पृथ्व्यां भ्रमन् दैवयोगात्तस्यामेव देश्यकुड्यां निद्रामप्राप्तस्तदुक्तं सर्वं श्रुत्वा दधावे। 'मा मा' इति जल्पन् यावद् आगतस्तावत् सहसा पपात, कूपमध्ये पतितेन महाबलेनोक्तम्—भोः कस्त्वम्?' तेनापि महाबलस्वरमुपलक्ष्य प्रोक्तम्—'भोः! पूर्वं मे भालं स्वनिष्ठ्यूतेन मर्दय'। तेन मर्दिते स पुंरूपं त्यक्त्वा मलयसुन्दरी जाता। तावता कूपभित्तिस्थसर्पेण मुखं बहिष्कृतम्। तस्य शीर्षमणिना प्रद्योते कृते महाबलः स्वप्रियां दृष्ट्वा परां प्रीतिं प्राप्तो बभाषे-'हे प्रिये! किमिदम्?'। साऽपि रुदती सर्वमनुभूतं प्राह। 'धिग् दैवम्!' इति वदन् सोऽपि स्वस्वरूपं प्रोचे। तौ वार्तालापपरौ रात्रौ तत्र सुखं तस्थतुः। प्रभाते जाते कन्दर्पो राजा तां नष्टां श्रुत्वा पादानुसारेण धावन् कूपकण्ठमुपेत्य तौ मध्ये दृष्ट्वा प्रोचे-'भोः! कौ युवाम्?'। महाबलेनोक्तम्—'अहं मद्दयिता चेयम्'। राज्ञोक्तम्—'निष्काशयामि'। तेन 'निष्काशय' इत्युक्ते प्रिया तं प्रति प्राह- 'प्राणेश! सोऽयं कन्दर्पो राजा येनाहं बाढं सन्तापिताऽस्मि। एष मयि लुब्धोऽस्ति। बहिर्निर्गमे त्वां हनिष्यति'। तेनोक्तम्—'मा भैषीः, बहिर्निर्गतो भव्यां शिक्षां दास्ये,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो राज्ञा रज्जुबद्धे मञ्चिके मध्ये क्षिप्ते। तावारुह्योपरि प्राप्तौ। राज्ञा मलयसुन्दरीं बहिर्नीत्वा छुरिकया रज्जुं छित्त्वा मञ्चिकास्थमेव कुमारं कूपान्तः पातयामास। रुदतीं मलयसुन्दरीं कूपझम्पां ददतीं निरुध्य गृहीत्वा क्वापि गृहे स्थापयित्वा राजा स्वभवने ययौ। सा यामिकै रक्ष्यमाणा भूमौ लुठन्ती सर्पेण दष्टा। 'अहं दष्टाऽस्मि' इति तस्यां वदन्त्यां यामिकैः स सर्पो दृष्ट्वा हतः। साऽपि नमस्कारं स्मरन्ती कृताराधनाऽस्थात्। राजापि तज्ज्ञात्वाऽत्याकुलः समेत्य विषप्रतीकारांश्चक्रे। तेषु क्रियमाणेष्वपि सा मूर्च्छां गता श्वासमात्राऽभूत्। एवं रात्र्यतिक्रमे जाते प्रभाते राज्ञा पटहो दापितः-'यो बालां सज्जीकरोति तस्मै राजा रणरङ्गनामानं गजं देशं कन्यां च दत्ते'। स पटह एकेन पुंसा स्पृष्टः। स च राज्ञः पार्श्वं नीतः। राजा तमुपलक्ष्य अचिन्तयत्-'स एवायम् अस्याः प्रियः, केनायं कूपात् कृष्टः?'। इति चिन्तयन् आकारसंवरं कृत्वा प्रोचे-'भो! इमां सज्जां कुरु, यदुक्तमस्ति तद् दास्ये'। तेनोक्तम्-'वैदेशिकोऽहं, मत्प्रियाम् इमामेव देहि, परेणाऽलम्'। राज्ञोक्तम् भव्यम्, एवमस्तु परं केचिद् मदादेशास्त्वया साध्याः'। तेन प्रपन्नम्। राजा तं गृहीत्वा मलयसुन्दरीपार्श्वं गतः। स कुमारस्तत्र निर्जनं कृत्वा, पवित्रभूमिं विधाप्य, पानीयमानाय्य, कटिपट्टकात् सर्पमणिमादाय, जलेन क्षालयित्वा, तेनैव जलेन तां सिक्त्वा सचेतनां कृत्वोत्थापयामास। सापि प्रियं वीक्ष्य प्रीत्या प्रोचे-'हे प्राणेश! कथं कूपान्निर्गतः?'। सोऽवादीत्-''शृणु, अहं कूपान्तः पतितो दिशोऽवलोठयन् शिलाच्छन्नं द्वारमेकं दृष्ट्वा पादप्रहारेण शिलां दूरीकृत्य मध्ये प्रविष्टः सुरङ्गया चलितः। तेनैव सर्पेणाग्रे भूत्वा गच्छता मणितेजसाऽन्धकारोऽपि दूरीकृतः। कियत्यपि मार्गे



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विद्यमाने सर्पो नष्टः। मया चाग्रे आस्फालितेन सता हस्तेन द्वारमुद्घाटितम्। निर्गतश्चाहम्। मया चिन्तितम्–'चौरसुरङ्गेयं घटते, परं चौरो मृतः'। पुनरग्रे गच्छता स एव सर्पो मया कुण्डलं कृत्वा निविष्टो दृष्टः। मन्त्रेण वशीकृत्य मणिं गृहीत्वा ततोऽहं तव स्नेहात् पुरं प्राप्तः। पटहं दीयमानं दृष्ट्वा स्पृष्ट्वा च प्राप्तोऽस्मि। सर्पमणिना त्वं सज्जिताऽसि"। इति वार्तां कृत्वा तेनाहूतः सपरिजनो राजा तत्र तां सज्जां दृष्ट्वा हृष्टः। उपविष्टः सन् समाचष्ट–'भोः! किं ते नाम?'। इत्युक्ते तेनोक्तम्–'सिद्ध इति मे नाम'। ततः सिद्धेनोक्तम्–'प्रियां गृहीत्वा अथ स्वस्थानं यामि'। राजा शृणोत्यपि न, अन्याश्च वार्ताश्चक्रे। अपृच्छच्च–'तवेयं किं स्यात्?'। तेनोक्तम्–'ममेयं प्रिया वियुक्ताऽधुना मिलिता, त्वं सत्यवाग् असि, मां विसर्ज'। राज्ञोक्तम्–"तर्हि मे कार्यं कृत्वा व्रज। शृणु, नित्यं मे शिरो दुःखयति। वैद्येनैकेन औषधं प्रोक्तमस्ति–'यः कश्चिन्नरस्तव लक्षणैः सदृग् भवति स यदि दह्यते, तद्भस्म च भाले न्यस्यते तदा शिरोऽर्तिर्याति"। इति श्रुत्वा सिद्धेन चिन्तितम्–'अहो! क्षुद्रादेशः, अयं मां हन्तुमिच्छति?। परं द्विधापि मृत्युरस्ति, इत्यनुष्ठितमिदं वरम्' इति चिन्तयन् सोऽवादीत–'करिष्यामि–'ते कार्यम्'। राजा स्वगृहं ययौ। तौ च यामिकै रक्षितौ पृथक् पृथक् स्थापितौ।

द्वितीयदिने पाश्चात्ययामे सिद्धेन काष्ठानि प्रहितानि। राजनरैर्लोकैश्च युक्तो विहिताऽन्त्ययोग्यवेषस्तत्र ययौ। तेन स्वयमेव योग्यभूमौ चिता स्थापिता। मलयसुन्दरी च तज्ज्ञात्वा महादुःखं प्राप्ता। तदा पुरलोकास्तद् पुरतं विनश्यद् दृष्ट्वा कृपया राजानं विज्ञपयामासुः–'प्रभो! किमर्थं परोपकारी नरो मुधा हन्यते?'।





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राज्ञोक्तम्–'सा तत्प्रिया मदन्तःपुरे तिष्ठतु, स च यातु । न कोऽप्येनं हन्ति' । तदा जीवाभिधानेन
मन्त्रिणाप्युक्तम्–'भोः ! किमेषा चिन्ता भवतामस्ति ?, भवद्भिः स्वगृहचिन्ता क्रियताम्' जनाः शिरो धूनयन्तो
गताः । सिद्धः सकललोकेषु हाहाकारं कुर्वत्सु चितामध्यं प्रविष्टः, राजनरैश्चतुर्दिक्षु वह्निर्दत्तः । अर्धज्वलितं
कृत्वा ते तत्स्वरूपं राज्ञः प्रोचुः । स हृष्टः । लोकानां रात्रौ तद्दुःखेन निद्राऽपि नागमत् । प्रातः स एव
सिद्धः शिरसि रक्षापोट्टलकं वहन् सकौतुकं जनैर्वीक्ष्यमाणो राजसभां गत्वा प्रोचे—'शिरसि क्षिप्यतामेषा रक्षा' ।
राज्ञोऽपि चित्रं जातम् । उक्तं च—'भोः! किं त्वं न दग्धः?' । तेनापि कूटमुक्तम्—'हे नरेन्द्र! चिताग्नौ
दग्ध एवाहं, परं मे सत्त्वेन तुष्टैर्देवैरग्निः शमितः, जीवितश्चाहम्' । राज्ञा चिन्तितम्—'कूटं वक्ति, वह्निज्वलने
जनानां दृशो वञ्चयित्वा नष्टो घटते!' । ततो रक्षकैर्वृतो मलयसुन्दरीस्थानं ययौ । तत्र भुक्त्वा समये स तया
पृष्टः–'प्राणेश! कथं जीवितोऽसि?' तेनोक्तम्—'शृणु, यया सुरङ्गया कूपान्निर्गतस्तस्या मुखद्वारोपरि चिता
स्थापिता । मध्ये प्रविष्टोऽहम् । यदा ज्वलनो लग्नस्तदा तद् द्वारमुद्घाट्य सुरङ्गामध्ये स्थितः । वह्नौ ज्वलित्वा
स्थिते निर्जने निर्गत्यागतोऽस्मि । त्वया कस्यापि न वक्तव्यम्' । पुना राजसमीपं गत्वोचे–'मां सभार्यं ॥ ५४ ॥
विसर्जय' । राज्ञोक्तम्–'द्वितीयमपि कार्यं कुरु' । तेनोक्तम्–'किं कार्यम्।' । राज्ञा जीवमंत्रिणो मुखं
वीक्षितम् । तेनोक्तम्–'शृणु, पुरप्रत्यासन्ने छिन्नटङ्कगिरिरस्ति । तस्मिन्नेकैव पद्याऽस्ति । तस्याऽधंतटे सदाफलः
सहकारोऽस्ति । त्वया पद्यया गिरिशीर्षमारुह्य चूतं प्रति झम्पा दातव्या । तस्य वृक्षस्य फलानि लात्वा भूमिं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रति झम्पा दातव्या । एवं फलान्यानीय भूभुजे देहि, येनास्य पित्तमुपशाम्यति’ । सिद्ध इति श्रुत्वा शिरो धूनयन्, ‘अहो ! क्षुद्रादेशः !’ इति चिन्तयन्, ‘अत्र कापि मतिर्नास्ति, मृत्युरेवास्ति । यदि वाऽप्राप्तभार्यो व्रजामि तदापि मृत्युरेव, द्विधापि तद्भावे साहसमेव वरम्’ इति ध्यात्वा, ‘अवश्यं करिष्यामि ते कार्यम्’ इत्युक्त्वा, ‘राजनरैर्वेष्टितः स चलितः । पौरलोका हाहारवं कुर्वन्ति । पर्वते चटित्वा चूतं प्रति झम्पां दत्त्वा अदृश्यश्चाभूत् । लोकैश्चिन्तितम्–‘अस्थीनि पृथक् पृथग् भूत्वा गतानि’ । सर्वः कोऽपि सदुःखो गृहमागात् । प्रातः स एव सिद्धः शीर्षे फलभृत्करण्डं वहन् जनानां कौतुकं दर्शयन् राजसभामागात् । राजा विस्मितः । सोऽपि नृपमनुज्ञाप्य फलद्वयं गृहीत्वा करण्डं तथैवाच्छाद्य ‘प्रतीक्ष्यः क्षणम्, आगच्छन्नस्मि’ इत्युक्त्वा मलय-सुन्दरीपार्श्वं गतः । सा प्रीतिं प्राप्ता । फले दत्ते । निविष्टं च सा प्राह–‘प्रिय! कथय, कथं कार्यं सिद्धम्’? स प्राह–‘शृणु, यो योगी मे पूर्वपरिचितः स मृत्वा तत्राम्रे व्यन्तरो जातोऽस्ति । तेनाहं पतन् दृष्ट्वा कराभ्यामुत्पाट्य भव्ययुक्त्या वृक्षे स्थापितः । उपकारवार्तया रात्रिर्गता । प्रातर्व्यन्तरेणोक्तम्–‘किं ते पतन-कारणम्?’ । मया स्वरूपे प्रोक्ते तेनोक्तम्—‘राजा त्वां हन्तुमिच्छति ततोऽहं नृपमेव हन्मि’ । ‘मयोक्तम्–‘यदि अस्मिन् कार्ये कृते सति स बुध्यते तदा किं हन्यते?’ । तेनोक्तम्–‘त्वया विषमकार्ये समर्थोऽहं, सर्वं करिष्ये’ । ततस्तेन कुतोऽपि करण्डकमानीय फलैः प्रपूर्य सुखेन पुरसमीपमानीतः । प्रोक्तं च– ‘अहम् अदृश्य एव त्वया सह सभां गमिष्यामि’ । ततोऽहं करण्डं सभायां मुक्त्वा त्वन्मुदेऽत्रागतोऽस्मि’ ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्रावसरे सभायां सिद्धमुक्तकरण्डात् शब्द उद्गतः –'राजानं भक्षयामि मंत्रिणं वा भक्षयामि'। इति श्रुत्वा सर्वेऽपि भीताः प्राहुः –'सिद्ध एवायं गूढात्मा, तस्य शक्तिर्न सामान्या, करण्डे किमपि भयङ्करमस्ति'। तदा जीवमंत्री 'किं भयङ्करम्?' इति वदन् लोकैर्वार्यमाणोऽपि तं करण्डमुद्घाटयत्। तत्क्षणं करण्डादग्निज्वाला निर्गता। तथा तत्क्षणं मंत्री भस्मीभूतः। सा च सभां ज्वालयितुं प्रवृत्ता। राज्ञा भीतेन सिद्ध आकारितः। तेन करण्डमाच्छाद्य जलेन च्छटा क्षिप्ता, सर्वं शान्तं जातम्। ततः पुनः करण्डमुद्घाट्य आम्रफलानि लात्वा सर्वेभ्यो दत्तानि। सर्वः कोऽपि चमत्कृतोऽचिन्तयत्–'सत्यः सिद्धोऽयं स्यात्'। अथ राज्ञा मंत्रिपदे मंत्रिसुत एव निवेशितः।

पुनर्दिनद्वयेऽतिक्रान्ते सति सिद्धेनोक्तम्—'अहं सभार्यो यामि'। परं राजा मलयसुन्दरीरागं न मुञ्चति। तं प्रति प्राह—'भो! एकं कार्यं कृत्वा यथेष्टं व्रजेः'। सिद्धः सकोपोऽवक्—'किं कार्यम्?'। राज्ञोक्तम्–'तथा कुरु यथा स्वीयमुखेन पृष्ठं पश्यामि'। सिद्धेन रुष्टेन गलमामोट्य मुखं पश्चात् कृत्वा प्रोक्तम्—'पश्य यथेष्टं पृष्ठम्। सभा क्षुब्धा। मंत्री प्राह–'त्वं धूर्तः शिक्षायोग्यः'। तदा सर्वमन्तःपुरं तां वार्तां श्रुत्वा समेत्य सिद्धस्य पादयोर्लग्नम्। 'कृपां कुरु, नृपं सज्जं कुरु'। इत्यादिचाटुभिर्भिन्नहृदयः स प्राह–'यदि एवंविध एव पादचारेण पुराद् बहिर्गत्वा प्रासादस्थश्रीअजितनाथप्रतिमां नत्वा समेति तदा सज्जं करोमि, नो चेद् एवंविधो मरिष्यति'। ततो राजा लोकैः सहास्य कौतुकं सदयं दृश्यमानो जिनं नत्वा आगात्। सिद्धेन नसां चालयित्वा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुखं स्वस्थाने कृतम्।'अथ यामि' इति सिद्धेनोक्ते राज्ञा प्रत्युत्तरेऽदीयमाने वाजिशालायां वह्निर्लग्नः। राज्ञोक्तम्–'मम पट्टतुरङ्गमं ज्वलन्तं वह्निमध्याद् निष्काशय'। इति श्रुत्वा सिद्धो वह्नौ झम्पां दत्त्वा क्षणात् स्वर्णपर्याणभूषिताऽश्वारूढो दिव्यशृङ्गारः समेतः। सर्वेषां चित्रं जातम्। राज्ञा पृष्टम्–'कथं समेतः?'। सिद्धेनोक्तम्–'महाप्रभावोऽयं वह्निः. योऽत्र प्रविशति स एवंविधो भूत्वा समेति'। इति श्रुत्वा सर्वः कोऽपि प्रवेष्टुं सज्जोऽभूत्। सिद्धेनोक्तम्–'पूर्वं राजा मंत्री च गच्छतां, शेषाः क्षणं प्रतीक्षध्वम्' ततो नृप-मंत्रिणौ वह्निं प्रविष्टौ। क्षणान्तरे लोकेनोक्तम्–'किमद्यापि नागच्छताम्?'। तेनोक्तम्–'समेष्यतः!'। घटीचतुष्केऽप्यतिक्रान्ते तौ नागतौ। लोकेनोक्तम्–'को हेतुः?'। तेन हसित्वोक्तम्–'भो! अहं देवसान्निध्याद् निर्गतोऽस्मि। तौ तु वह्निं गतौ अनश्यताम्। अन्यायद्रुमोऽनयोः फलितः'। ततः सर्वलोकैस्तत्र स एव राजा स्थापितः। शत्रून् जयन् 'सिद्धराज' इति नाम्ना ख्यातो राज्यमपालयत्। 'स्मृतेनागन्तव्यं त्वया' इति विसृष्टो व्यन्तरो ययौ।

अन्यदा बलसारोऽपि देशान्तरादागतः, प्राभृतं कृत्वा सिद्धराजमुपतस्थौ। तेन तस्य वामाङ्कस्था मलयसुन्दरी दृष्टा, तयाऽपि स उपलक्षितः। स च राज्ञा भाषितः शङ्कितः स्वस्थानं ययौ। मलयसुन्दर्या प्रियस्याग्रे तस्य स्वकीयकदर्थना–पुत्रहरणस्वरूपं प्रोक्तम्, तदा राज्ञा स सकुटुम्बो धृतोऽचिन्तयत् –'पृथ्वीस्थानेशः सूरपालः, चन्द्रावतीशो वीरधवलश्च' एतौ द्वौ परिचितौ वर्तेते। एतत्पुराधिपेन च सह तयोः सदैव वैरं वर्तते। ततस्तयोरेव ज्ञापयामि, अष्टाष्टौ द्रम्मलक्षाणि द्वीपानीतांश्चाष्टौ गजान् ददामि, स्वं च मोचयामि'। इति विचिन्त्य सोमनामा कोऽपि





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वकीयस्तेन प्रेषितः । अस्मिन्नवसरे वीरधवलः सूरपालश्च पृथक् पृथग् लोकमुखशुद्धया रौद्राटव्यां दुर्गतिलके गिरौ भीमपल्लीपतेः पार्श्वे मलयसुन्दरीं श्रुत्वा तत्र प्राप्तौ । भीमं जित्वा मलयसुन्दरीशुद्धिमपि अप्राप्य विषण्णौ यावत् स्वस्थानं गच्छतस्तावता सोमस्तत्रैव गतः सर्वं बलसारोक्तं स्वरूपं बभाषे । तौ द्वावपि अर्धमर्धं प्रपद्य सोम-प्रेरितौ सागरतिलकतटपुरं प्रति चलितौ । सन्धौ गत्वा ताभ्यां दूतः प्रहितो गत्वा सिद्धराजं प्रति जगौ–'भोः पृथ्वीस्थानाधिपः चन्द्रावतीपुरीस्वामी च द्वौ नरेश्वरौ वक्तः–सोऽयम् अस्मत्परिचितो बलसारोऽस्ति । ततोऽस्मद्वच-साऽपराध एकः सह्यतां, मुच्यतामेषः' । इत्यादिदूतवाक्यानि श्रुत्वा पितृ–श्वशुरयोरागमनं ज्ञात्वा हृदि मुदितोऽपि बाह्याकारेणाटोपं बिभ्राणो बभाषे–'भो दूत ! यद्यपि तौ नृपौ मान्यौ, तथापि अन्यायिनः पक्षपातं कुर्वाणौ अन्यायिनावेव, ततः शिक्षार्हौ वर्तेते, रणे शिक्षां दास्ये' । इति निर्भर्त्स्य दूतं प्रेष्य रणभेरीं ताडयित्वा ससैन्योऽसौ चचाल । द्वयोरपि सैन्ययोर्युद्धं जातम् । सिद्धराजबले भग्ने सति स स्वयमेव युद्धं कर्तुं ढुढौके । व्यन्तरः स्मृतः । कुमारेण शत्रूणां शस्त्राणि अर्धपथे छिन्नानि, स्वशस्त्राणि च शत्रुशरीरे लगन्ति । भटेषु व्याकुलीभूय नश्यत्सु सूर–वीरधवलौ स्वयमुत्थितौ । अथ सिद्धराजेन तावपि अत्याकुलौ कृतौ, खिन्नौ, तदा सिद्धराजेन लेखो बाणमुखे न्यस्य प्रेषितः । स च बाणः सूरस्य प्रदक्षिणां दत्त्वा अग्रे स्थित्वा प्रणनाम । राज्ञा लेखो गृहीत्वा वाचितः–'त्वत्पुत्रो महाबलः प्रणमति' । राजा हृष्टो दधावे । सिद्धराजोऽपि पादचारी पितुः पादौ प्रणनाम । सर्वः कोऽपि हृष्टः । सर्वेऽपि नृपा महोत्सवेन सागरतिलकं पुरं प्रापुः । मलयसुन्दरी पितरं नमति स्म ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परस्परं सर्वं स्वरूपं प्रोक्तम्। सूरपालेनोक्तं बलसारं प्रति–'रे! मम पौत्रं देहि'। तेनोक्तम्–'यदि मे सकुटुम्बस्याऽभयं दीयते तदा तं ददामि' राज्ञा प्रपन्ने तेन स दत्तः। राज्ञोत्सङ्गे निवेशितः। प्रोक्तं च–'भोः! किमस्य नाम?' बलसारेणोक्तम्–'बल इति नाम'। तदा तेन बालेन पितामहकरस्थितदीनारशत-ग्रन्थिश्चालितः, ततस्तेन तस्य 'शतबल' इति नाम दत्तम्। सर्वस्वं गृहीत्वा श्रेष्ठी सकुटुम्बो जीवन् मुक्तः। सिद्धराजेन सर्वं राज्यं पितुर्दौकितम्।

अन्यदा श्रीपार्श्वनाथस्य शिष्यश्चन्द्रयशाः केवली गुरुस्तत्रागात्। तदा तौ सूर-वीरधवलौ सकुटुम्बौ नृपौ तं नन्तुं गतौ। उपदेशं श्रुत्वा श्रीवीरधवलेन पृष्टम्—'प्रभो! पुत्री समुद्रे पतिता गजमत्स्येन सुखेन कथमुत्तारिता?, स्नेहश्च दर्शितः! केवली प्राह–'श्रूयताम्, अस्या धात्री वेगवती मृत्वा समुद्रे गजाकारमत्स्यो जातः। भारण्डमुखात् तस्योपरि त्वत्पुत्री पतिता। तस्य मत्स्यस्य तां पश्यतो जातिस्मरणमुत्पन्नम्। ततस्तेन सा पृष्ठे धृतैव तटे मुक्ता, स्नेहेन च पश्यन् समुद्रं गत्वा प्रासुकाहारं गृह्णन् तिष्ठति। स च मृत्वा सुगतिं यास्यति'। अथ सूरो नृपः प्राह–'प्रभो! किमेतयोर्वधू-पुत्रयोर्यौवने दुःखं जातम्?'। मुनिः प्राह–श्रूयतां तत्रैव पृथ्वीस्थाननगरे प्रियमित्रनामा गृहपतिर्लक्ष्मीवान्, परं पुत्रहीनोऽभूत्। तस्य रुद्रा भद्रा प्रियसुन्दरी चेति तिस्रः प्रिया अभूवन्। रुद्रा-भद्रे भगिन्यौ मिथः स्नेहले अभूतां, परं तयोर्द्वयोर्दयितस्य प्रेमलेशोऽपि न। प्रियसुन्दरी च प्रियस्य प्रियाऽभूत्। अन्यदा तस्य मित्रं मदनो नाम प्रियसुन्दर्यां रक्तः सन् तया सह हास्यं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्रे। तत्स्वरूपं दृष्ट्वा क्रुद्धः प्रियमित्रस्तद्बन्धूनां ज्ञापयित्वा मदनं नगरान्निरकाशयत्"। अस्मिन्नवसरे वृद्धमनुष्याः प्राहुः-इदं सर्वमस्मद्गोचरे जातम्, अद्यापि तद्गृहं शून्यमस्ति'। नृपः प्राह-'प्रभो! अग्रे किम्?'। मुनिः प्राह-'मदनः पुरान्निष्काशितो दिनद्वयं क्षुधितोऽटव्यां गोकुले गतः। गोपालेभ्यः पयः प्रार्थितं, तैश्च महिषीदुग्धेन भृतो घटो दत्तः। स च तं लात्वा पातुं सरः प्रति गच्छन् अचिन्तयत्-'यदि कस्मैचिद्दत्त्वा पिबामि तदा भव्यम्'। इति चिन्तयतोऽस्याग्रे कोऽपि मासोपवासी मुनिर्मिलितः, तेन भावेन प्रतिलाभितो ययौ। सोऽपि पयः पीत्वा सरसि प्रविशन् स्खलितपदः पतितो जलमग्नो मृत्वा दानप्रभावाद् अत्रैव पुरे विजयस्य राज्ञः पुत्रोऽभूत् कन्दर्पनामा। पूर्वभवाभ्यासात् तस्य मनः मलयसुन्दर्यामासक्तमासीत्।

अथ प्रियसुन्दरी-प्रियमित्रौ पृथ्वीस्थानपुरे विलसन्तौ धनञ्जययक्षयात्रार्थं रथारूढौ चलितौ। ताभ्यां मार्गे मुनिरेको दृष्टः। प्रियसुन्दरी प्रोचे-'रे मुण्डोऽधमः, अपशकुनं महत्!'। सुन्दरनामानं भृत्यं च प्राह-'अमुष्माद् इष्टकापाकाद् वह्निमानय, यथाऽसौ दम्भ्यते'। तेनोक्तम्-'मम पादयोः पादुके न स्तः, कण्टका भज्यन्ते'। तदा रुष्टेन प्रियमित्रेणोक्तम्-'सुन्दरोऽस्मिन् वटे उद्बध्यतां यथा पादौ भूमौ न लगतः, कण्टका अपि न भज्यन्ते'। पुनः प्रियसुन्दरी शकटात् समुत्तीर्य भृशं कुपिता 'मे प्रियेण सह वियोगो मा भूत्, परं राक्षसाकार! त्वमेवस्वबन्धुभिर्वियुक्तो भूयाः'। इति वदन्ती त्रीन् बारान् लेष्टुभिस्तं मुनिं जघान। पश्चात् तस्य रजोहरणं गृहीत्वा रथे निविश्य बभाषे-'अथ चलत, अपशकुनं मस्तकेऽस्यैव पातितम्। ततस्तौ दम्पती यक्षालयं गत्वा यक्षं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूजयामासतुः । तत्रैका जिनधर्माऽनुरक्ता तद् रजोहरणं वीक्ष्य प्रोचे–'किमिदम् ?'। ताभ्यां साधुसन्तापस्वरूपे प्रोक्ते साऽवादीत्–'धिग् भवद्भ्यां विरूपं कृतं, महापातकमर्जितम्'। ततस्तौ भीतौ वलमानौ मुनिपार्श्वे समेत्य साश्रुपातं तत्पादयोर्लग्नौ, रजोहरणं च दत्तम् । साधुः कायोत्सर्गं पारयित्वा प्रोचे–'भो महाभीमौ ! जिनधर्मं कुरुताम्'। तौ गृहिधर्मं समाश्रित्य साधुं सबाढं क्षमयित्वा स्वस्थानं प्राप्तौ ।

अन्यदा स एव साधुस्तद्गृहे प्राप्तः, ताभ्यां भक्त्या प्रतिलाभितः । अन्यदा रुद्रा–भद्रे कलहं कुर्वाणे निर्विण्णे चिन्तयितुं लग्ने–'एष भर्ता प्रियसुन्दरीप्रीतिं न मुञ्चति, तत्किं नित्यं कलहकरणेन ?, अतो मृत्युरेव श्रेयान्'। इति विमृश्य ते द्वे अपि कूपे पतिते। तन्मध्ये या भद्रा सा जयपुरे चन्द्रपालस्य सुता कनकवती जाता, वीरधवलेनोढा च। रुद्रा व्यन्तरी जाता, भ्रमन्ती प्रतिष्ठानपुरं प्राप्ता, तौ प्रियसुन्दरी–प्रियमित्रौ च रात्रौ प्रीतिमन्तौ दृष्ट्वा भित्तिं पातयित्वा गता। तौ मृतौ। प्रियमित्रजीवो महाबलोऽभूत्, प्रियसुन्दरीजीवो मलयसुन्दरी जाता, सुन्दरकर्मकरजीवश्च वटे व्यन्तरोऽभूत्। अथ रुद्रा व्यन्तरी महाबलस्योपरि द्रोहं कर्तुमशक्ता तस्य वस्त्राभरणादिकमपजह्रे, लक्ष्मीपुञ्जहारस्तयैव महाबलकण्ठाद् अपहृत्य पूर्वभवस्वसृस्नेहात् कनकवतीकण्ठे निवेशितः । तया च कूटमुक्त्वा मलयसुन्दरीं प्रति कोपः कारितः । सुन्दरजीवेन भृत्येन पूर्वदुर्वचनं स्मृत्वा कुमारस्यापि तादृशमेव वटोद्बन्धकदुःखं शवमुखेऽवतीर्य कथितम् । अन्यदा भद्रया पत्युर्मुद्रारत्नं हृतमासीत्। सा च हरन्ती सुन्दरेण दृष्टाऽऽसीत् । प्रियमित्रेण पृष्टे सति सुन्दरेणोक्तम्–'भद्रया मुद्रारत्नं गृहीतमस्ति'। तदा भद्रा प्रोचे–'रे छिन्न-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नासिक ! त्वयैव गृहीतमस्ति, किं नार्पयसि ?' स मौनेन स्थितः। ततः प्रियमित्रेण साम-दण्ड-भेदादिभिर्ज्ञात्वा भद्रापार्श्वात् तद्गृहीतम्। तेन हेतुना तेन भूतेन कनकवतीनासिका गृहीता, कनकवती च च्छिन्ननासाऽभूत्। कुमारोऽपि सुन्दरं प्रति दुर्वचनाद् वटे उद्बद्धः। साधुं प्रति राक्षसादिदुर्वचनादिभाषणाद् मलयसुन्दर्या राक्षसी-कलङ्कोऽभूत्। पूर्वं मलयसुन्दर्या अमुना कुमारेण च सुसाधुभ्यो दानं ददे, जिनधर्मश्च पालितस्तेनाभ्याम् उत्तम-कुलादिका सर्वसामग्री प्राप्ता। तथा मलयसुन्दर्या स यतिराक्रुष्टः, 'स्वबन्धुभिः सार्धं तवैव विप्रयोगोऽस्तु, त्वं राक्षस'इत्याद्याक्रोशवचनैर्भाषित्वा त्रीन् वारान् लेष्टुप्रहारैर्मुनिराहतः, महाबलोऽपि अनुमोदयन् मौनेन तस्थौ, तत आभ्यां दृढं पातकमर्जितम्। तस्याऽनुभावतो द्वयोर्निजलोकेभ्यस्त्रीन् वारान् वियोगोऽजनि। यद् मलयसुन्दर्या साधो रजोहरणं गृहीतं तेन कर्मणा अस्य बालः श्रेष्ठिना गृहीतः। एवं पूर्वभवकर्मफलमुपस्थितम्। स एवाहं साधुश्छिन्नकर्मा केवली जातोऽस्मि। मम स एव भवः, अनयोर्द्वितीयोऽभूत्"। इति महाबल-मलयसुन्दरीचरित्रं श्रुत्वा सूरपाल-वीरधवलौ भवनिर्विण्णौ प्रोचतुः-'प्रभो! दीक्षां ग्रहीष्यावः'। 'मा प्रतिबन्धः कार्यः' इति साधु-नोक्तं नृपौ स्वस्थानं गतौ। सूरपालेन पृथ्वीस्थानराज्यं महाबलाय दत्तम्। वीरधवलेनापि तत्रैव स्थितेन स्व-राज्यं मलयकेतवे पुत्राय दत्तम्। ताभ्यां पत्नीयुताभ्यां महोत्सवेन केवलिपार्श्वे दीक्षा गृहीता, समये च दिवं ययुः। महाविदेहे सिद्धिं प्राप्स्यन्ति।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ महाबलः शतबलं पुत्रं सागरतिलके नगरे स्थापयित्वा स्वयं च पृथ्वीस्थानपुरं गत्वा श्राद्धधर्मस्थितो राज्यमपालयत् । तस्य च द्वितीयः पुत्रः सहस्रबलनामाऽभूत् । एवं भुजबलेन व्यन्तरबलेन च बहून् नृपान् वशीकृत्य राज्यं श्रीजिनधर्मं च पालयन्, विशेषतः साधुभक्तिं च कुर्वन् पश्चिमे वयसि गुरोः पार्श्वे प्रियया युक्तो दीक्षां जग्राह । सागरतिलके शतबलो राजा, पृथ्वीस्थाने च सहस्रबलो राजाऽभूत् ।

अथ महाबलर्षिर्गीतार्थो भूत्वा गुर्वादेशाद् एकाकी विहरन् सागरतिलके सन्ध्यायां समेत्य वने कायोत्सर्गेण स्थितः । वनपालेन शतबलाय राज्ञे विज्ञप्तम् । सोऽपि हृष्टस्तस्मै दानं दत्त्वाऽचिन्तयत्–'साम्प्रतमन्धकारोऽभूत्, प्रातर्महोत्सवेन नन्तुं यास्यामः'। अस्मिन् समये सा कनकवती स्थाने स्थाने भ्रमन्ती तत्रैवागता। वने गतं महामुनिं दृष्ट्वा दध्यौ–'एष मूलतोऽपि मे वृत्तान्तं वेत्ति। यद्यसौ मम स्वरूपं लोकाग्रे वक्ष्यति तदाऽहं क्वापि प्रवेशं न लप्स्ये, ततोऽयं मार्यते तदा वरम्'। इति विचिन्त्य तया काष्ठानि वेष्टयित्वा मुनिर्ज्वालितः । महाबलमुनिः सुदुस्सहमुपसर्गं सम्यक् सहमानः केवलज्ञानमासाद्य सिद्धिं ययौ। प्रभाते शतबल उत्कण्ठितो नन्तुमागतः । मुनिस्थाने भस्मपुञ्जं दृष्ट्वा शङ्कितः, क्वापि तातं न ददर्श, किन्तु पदानुसारेण सा छिन्ननासा दृष्टा। तया ताड्यमानया सर्वं सत्यमुक्तं, तदा सा कदर्थनया मारिता षष्ठं नरकं ययौ। राजा दुःखाक्रान्तो विलप्य स्वस्थानं ययौ। मलयसुन्दरी महत्तरापदं प्राप्ता । महाबलनिर्वाणेन पुत्रं दुःखितं ज्ञात्वा प्रबोधायागता । तं प्रबोध्य पश्चात् सहस्रबलं प्रतिबोधयितुं पृथ्वीस्थानं पुरं गता। कतिचिद्दिनपर्यन्ते शतबलोऽपि महत्तरां नन्तुमुत्क-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तत्रागात् । तत्र च तौ मिलितौ द्वावपि पुत्रौ दुःखहीनौ कृत्वा महत्तराऽन्यत्र विजहार । तौ च द्वावपि स्वस्वपुरे स्थितौ राज्यं पालयतः स्म । मलयसुन्दरी प्रान्ते आराधनां कृत्वा द्वादशे देवलोके जगाम, महाविदेहे च समुत्पद्य विदेहे सिद्धिं यास्यति । इति मलयसुन्दरीकथां श्रुत्वा मलयसुन्दरीवद् ज्ञानं शीलं च पाल्यं विवेकिभिः । यथा ताभ्यां पूर्वभवे मुनेराशातना कृता तथा न केनापि कर्तव्या ।

श्रीमत्पार्श्वजिनेन्द्रनिर्वृतिदिनाद् याते [1]समानां शते, संजज्ञे नृपनन्दना मलयतः सुन्दर्यसौ नामतः । एतस्याश्चरितं यथा गणभृता प्रोक्तं पुरा केशिना, श्रीमच्छङ्खनरेश्वरस्य पुरतोऽप्यूचे मयेदं तथा ॥१॥ सङ्क्षेपेणाऽवबोधाय विस्तरो दुस्तरो भवेत् । न सङ्क्षेपो न विस्तारः कथितश्चेह तत्कृते ॥ २ ॥

॥ इति श्रीअञ्चलगच्छे श्रीमाणिक्यसुन्दरसूरिकृतायां श्रीमलयसुन्दरीकथायां चतुर्थ उल्लासः ॥

॥ इति गद्यबद्ध-श्रीमलयसुन्दरीकथा ॥

१ वर्षाणाम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only